Contents

शान्ति मंत्रः (śānthi mantraḥ)

ॐ शं नो मित्र-श्शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः।
शं नो विष्णु-रुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं
ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं
वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।
ॐ शान्तिः शान्तिः शान्तिः॥

ॐ सह नाववतु। सह नौ भुनक्तु।सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै॥
ॐ शान्तिः शान्तिः शान्तिः

oṁ śaṁ no mitraḥ śaṁ varuṇaḥ | śaṁ no bhavatvaryamā | śaṁ na indro bṛhaspatiḥ | śaṁ no viṣṇrurukramaḥ | namo brahmaṇe | namaste vāyo| tvameva pratyakṣaṁ brahmāsi| tvāmeva pratyakṣaṁ brahma vadiṣyāmi| ṛtaṁ vadiṣyāmi | satyaṁ vadiṣyāmi | tanmāmavatu | tadvaktāramavatu | avatu mām | avatu vaktāram || oṁ śāntiḥ śāntiḥ śāntiḥ ||

oṁ saha nāvavatu | saha nau bhunaktu | saha vīryaṁ karavāvahai | tejasvināvadhītamastu mā vidviṣāvahai || oṁ śāntiḥ śāntiḥ śāntiḥ ||

अनुज्ञ (anujñaḥ)

ॐ श्री मातृभ्यो नमः।	oṁ śri mātṛbhyo namaḥ	
ॐ श्री पितृभ्यो नमः।	oṁ śri pitṛbhyo namaḥ	
ॐ श्री गुरुभ्यो नमः।	oṁ śri gurubhyo namaḥ	
ॐ सर्वेभ्यो देवेभ्यो नमः।	oṁ sarvebhyo devebhyo namaḥ	
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः।	oṁ sarvebhyo brāhmaṇebhyo namaḥ	

प्रारम्भ कार्यं निर्विघ्नम् अस्तु। शुभं शोभनम् अस्तु।
इष्टदेवता कुलदेवता आश्रम देवता सुप्रसन्नो वरदो भवतु॥
अनुज्ञां देहि॥

prārambha kāryaṁ nirvighnamastu| śubham śobhanam astu| iṣta devatā kula devatā āśrama devatā suprasanno varado bhavatu| anujñām dehī||

अन्तर्बाह्यशुद्धिः (antar-bāhya-śuddhiḥ)

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शूचिः।

oṁ apavitraḥ pavitro vā sarvāvasthāṁ gatopivā |
yaḥ smaret puṇḍarīkākṣaṁ sa bāhyābhyantara śuciḥ ||

श्री विघ्नेश्वर पूजा (śrī vighneṣvara pūjā)

आचमनीयम् (ācamanīyam)

ॐ अच्युताय नमः। om̐ acyutāya namaḥ।

ॐ अनन्ताय नमः। om̐ anantāya namaḥ।

ॐ गोविन्दाय नमः। om̐ govindāya namaḥ।

केशव। नारायण। माधव। गोविन्द। विष्णुः। मधुसूदन। त्रिविक्रम।
वामन। श्रीधर। हृषीकेश। पद्मनाभ। दामोदर॥

keśava, nārāyaṇa, mādhava, govinda, viṣṇu ,
madhusūdana, trivikrama, vāmana , śrīdhara, hṛṣīkeśa,
padmanābha, dāmodara

श्री विघ्नेश्वर ध्यानम् (śrī vighneśvara dhyānam)

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये। श्री विघ्नेश्वरं ध्यायामि॥

om̐ śuklām̐baradharam̐ viṣṇum̐ śaśivarṇam caturbhujam।
prasannavadanam̐ dhyāyet sarva vighnopaśāntaye।
śrī vighṇeśvarm̐ dhyāyāmi।।

प्राणायामः - prāṇāyāmaḥ

ॐ भूः। ॐ भुवः। ॐ॰सुवः।ॐ महः।ॐ जनः।ॐ तपः।
ॐ॰ सत्यम्॥
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥
ॐ आपो ज्योतिरसोऽमृतं ब्रह्म भुर्भुव सुवरोम्॥

om̐ bhūḥ। om̐ bhuvaḥ। ogm̐ suvaḥ। om̐ mahāḥ। om̐ janaḥ ।
om̐ tapaḥ। ogm̐ satyam ।
om̐ tatsaviturvareṇyam̐ bhargo devasya dhīmahi ।
dhiyo yo naḥ pracodayāt ।।
omāpo jyotī raso'mṛtam̐ brahma bhūrbhuva-ssuvarom ।।

सङ्कल्पः (sankalpaḥ)

ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं
करिष्यमाणस्य कर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आदौ
श्री विघ्नेश्वर पूजां करिष्ये ॥ *अप उपस्पर्श्या*

mamopātta samastaduritakṣayadvārā śrī parameśvara
prītyarthaṁ kariśyamāṇasyā karmaṇah nirvighnena
parisamāptyarthaṁ ādhau śrī vighṇeśvara pūjāṁ kariśye.
apa-upasparśya (clean your hands with water)

घण्टा नादः (ghaṇṭānādaḥ)

आगमार्थं तु देवानाम् गमनार्थं तु रक्षसाम् ।
कुर्वे घण्टारवं तत्र देवताह्वान लक्षणम् ॥

āgamārtam tu devānam gamanārtam tu rakṣhasām |
kurve ghantaravam tatra devatāhvāna lakṣaṇam||

श्री महागणपति आवाहनम् (śrī mahāgaṇapati āvāhanam)

ॐ गणानां त्वा गणपतिं॑ हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥

oṁ gaṇānāṁ tvā gaṇapatigṁ havāmahe kaviṁ kavīnām
upamaśravastamam | jyeṣṭharājaṁ brahmaṇāṁ
brahmaṇaspata ā naḥ śṛṇvannūtibhissīda sādanam ||.

अस्मिन् बिम्बे सुमुखं श्री महागणपतिं ध्यायामि ।
श्री महागणपतिं आवाहयामि ॥

asmin bimbe sumukham śrī mahā gaṇaptiṁ dhyāyāmi.
śrī mahāgaṇapatim āvāhayāmi||

ॐ श्री महागणपतये नमः । आसनार्थं पुष्पाणि समर्पयामि ॥

oṁ śrī mahāgaṇapataye namaḥ| āsanārthaṁ puṣpāṇi
samarpayāmi||

ॐ श्री महागणपतये नमः । पादयोः पाद्यं समर्पयामि ॥

oṁ śrī mahāgaṇapataye namaḥ| pādayoh padyam
samarpayāmi||

ॐ श्री महागणपतये नमः । हस्थयोः अर्घ्यं समर्पयामि ॥

oṁ śrī mahāgaṇapataye namaḥ| hastayoḥ arghyam
samarpayāmi||

ॐ श्री महागणपतये नमः । मुखे आचमनीयं समर्पयामि ॥

oṁ śrī mahāgaṇapataye namaḥ| mukhe ācamanīyam
samarpayāmi||

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ - ३

ॐ श्री महागणपतये नमः । स्नानं समर्पयामि ॥

स्नान-अनन्तरं आचमनीयं समर्पयामि ॥

oṁ ekadantāya vidmahe vakratundāya dhīmahi tanno danti pracodyāt - 3 times.

oṁ śrī mahāgaṇapataye namaḥ| snānam samarpayāmi| snānāntaram ācamanīyam samarpayāmi||

ॐ श्री महागणपतये नमः। वस्त्रार्थं अक्षतान् समर्पयामि ॥

oṁ śrī mahāgaṇapataye namaḥ| vastrārtham akṣatān samarpayāmi||

ॐ श्री महागणपतये नमः। यज्ञयोपवीतार्थं अक्षतान् समर्पयामि ॥

oṁ śrī mahāgaṇapataye namaḥ| yajñopavītārtham akṣhatān samarpayāmi||

ॐ श्री महागणपतये नमः। दिव्य-परिमळ गन्धान् धारयामि ॥

गन्धसयोपरि हरिद्रा-कुंकुमं समर्पयामि ॥

oṁ śrī mahāgaṇapataye namaḥ| divya parimaḻa gandhān dhārayāmi| gandhasyopari haridrā kumkumam samarpayāmi||

ॐ श्री महागणपतये नमः। अक्षतान् समर्पयामि ॥

oṁ śrī mahā gaṇapataye namaḥ| akṣhatān samarpayāmi||

ॐ श्री महागणपतये नमः। पुष्पैः पूजयामि ॥

oṁ śrī mahā gaṇapataye namaḥ. puṣpāni pūjayāmi||

ॐ सुमुखाय नमः	oṁ sumukhāya namaḥ
ॐ एकदन्ताय नमः	oṁ ekadantāya namaḥ
ॐ कपिलाय नमः	oṁ kapilāya namaḥ
ॐ गज-कर्णकाय नमः	oṁ gaja-karṇakāya namaḥ
ॐ लम्बोदराय नमः	oṁ lambhodharāya namaḥ
ॐ विकटाय नमः	oṁ vikaṭāya namaḥ
ॐ विघ्न-राजाय नमः	oṁ vighna rājāya namaḥ
ॐ विनायकाय नमः	oṁ vināyakāya namaḥ
ॐ धूम्रकेतवे नमः	oṁ dhūṁraketave namaḥ
ॐ गणाध्यक्षाय नमः	oṁ gaṇadhyakṣāya namaḥ
ॐ फालचन्द्राय नमः	oṁ phālachandrāya namaḥ
ॐ गजाननाय नमः	oṁ gajānanāya namaḥ
ॐ वक्र-तुण्डाय नमः	oṁ vakratundāya namaḥ
ॐ शूर्प-कर्णाय नमः	oṁ śūrpakarṇāya namaḥ

ॐ हेरम्बाय नमः	oṁ herambāya namaḥ
ॐ स्कन्द-पूर्वजाय नमः	oṁ skandapūrvajāya namaḥ
ॐ सिद्धिविनायक स्वामिने नमः	oṁ siddhivināyaka svāmine namaḥ

नानाविध परिमळ पत्र पुष्पाणि समर्पयामि ॥

nānā vidha parimaḷa patra puṣpāṇi samarpayāmi

धूपः (dhūpaḥ)

वनस्पति-रसोद्भूतः गन्धाढयो गन्ध-उत्तमः।

आघ्रेयः सर्वदेवानां धूपोयम् प्रतिगृह्यताम् ॥

ॐ श्री महागणपतये नमः। धूपम् आघ्रापयामि ॥

vanaspati rasodbhūta gandhāḍhyo gandha uttamaḥ|
āghreya sarvadevānam dūpo'yam pratigrihyatām||
oṁ śrī mahāgaṇapataye namaḥ| dūpam āgrāpayāmi||

दीपम् (dīpam)

दीपं गृहाण देवेश वर्तित्रय समन्वितम्।

अन्धकारे नमस्तुभ्यं अज्ञानं विनिवर्तय ॥

ॐ श्री महागणपतये नमः। दीपं दर्शयामि ॥

धूप दीपअनन्तरं आचमनीयं समर्पयामि ॥

dīpam gruhāṇa deveśa vartitraya samanvitam|
andhakāre namastubhyam ajñānam vinivartaya||
oṁ śrī mahā gaṇapataye namaḥ| dīpam darśayāmi||
dhūpa-dīpa anantaram ācamanīyam samarpayāmi||

नैवेद्यम् (neivedyam)

ॐ भूर्भुवस्सुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।

धियो यो नः प्रचोदयात् ॥

देव सवितः प्रसूव।

oṁ bhūrbhuvassuvaḥ tatsaviturvareṇyaṁ bhargo devasya dhīmahi | dhiyo yo naḥ pracodayāt || deva savitaḥ prasūva|

सत्यं त्वर्तेन परिषिञ्चामि। - Before 5:00pm

ऋतं त्वा सत्येन परिषिञ्चामि। - After 5:00pm

satyam tvartena pariṣincāmi - Before 5:00pm
ṛtam tvā satyena pariṣincāmi - After 5:00pm

अमृतोपस्तरणमसि।

ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ समानाय स्वाहा। ॐ ब्रह्मणे स्वाहा।

amrutopastaraṇamasi| oṁ prāṇāya svāhā| oṁ apānāya svāhā| oṁ vyānāya svāhā| oṁ udānāya svāhā| oṁ samānāya svāhā| oṁ brahmaṇe svāhā

ॐ श्री महागणपतये नमः। यथा शक्ति नैवेद्यं निवेदयामि।

निवेदन-अनन्तरं आचमनीयं समर्पयामि॥

मध्ये मध्ये अमृतपाणीयं समर्पयामि॥

अमृतापिधानमसि॥

oṁ śrī mahā gaṇapataye namaḥ| yathā śakti neivedyam nivedayāmi| nivedana-anantaram ācamanīyam samarpayāmi| madhye madhye amrutapaṇīyam samarpayāmi| amrutāpidhānamasi||

ताम्बूलम् (tambūlam)

पूगीफलसमायुक्तं नागवल्लीदलै-र्युतम।

कर्पूर-चूर्णसुंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ श्री महागणपतये नमः। कर्पूर ताम्बूलं समर्पयामि॥

pūgī-phalam samāyuktam nāgavallī dalairyutam|
karpūra cūrṇa samyuktam tambūlam prati-grhyatām||
oṁ śrī mahāgaṇapataye namaḥ| karpūra tambūlam samarpayāmi||

नीराजनम् (nīrājanam)

नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये। नमस्तेऽस्तु

लम्भोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्री वरदमूर्तये नमः॥

ॐ श्री महागणपतये नमः।

सर्वापराध क्षमार्त्थं सर्वमङ्गल प्राप्तये मंगल नीराजनं सन्दर्शयामि॥

नीराजनानन्तरम् आचमनीयं समर्पयामि॥

रक्षां धारयामि॥

namo vrāta-pataye| namo gaṇapataye| namaḥ pramata-pataye| namasteastu lambhodharāya-ekadantāya| vighna-vināśine| śiva-sutāya| śrī varada mūrtaye namaḥ||
oṁ śrī mahāgaṇapataye namaḥ |
sarvā-aparādha kṣhamārtham , sarva managaḻa prāptaye, mangala nīrājanam samarpayāmi||
nīrājana-anantaram ācamanīyam samarpayāmi||
rakṣāṁ dhārayāmi||

मन्त्रपुष्पम् (mantra puṣpam)

ॐ योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति।

चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति।

य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

ॐ श्री महागणपतये नमः। वेदोक्त मन्त्रपुष्पं समर्पयामि॥

yopāṁ puṣpaṁ veda| puṣpavān prajāvān paśumān bhavati| candramā vā apāṁ puṣpam | puṣpavān prajāvān paśumān bhavati | ya evaṁ veda | yopāmāyatanaṁ veda | āyatanavān bhavati || oṁ śrī mahāgaṇapataye namaḥ vedokta-mantra puṣpam samarpayāmi||

प्रार्थना (prārthanā)

ॐ वक्रतुण्ड महा काय सूर्यकोटिसमप्रभ
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥
ॐ श्री महागणपतये नमः। प्रार्थन नमस्कारान् समर्पयामि ॥

vakratuṇḍa mahākāya sūryakoṭi samaprabha |
nirvighnaṁ kuru me deva sarva kāryeṣu sarvadā ||
oṁ śrī mahāgaṇapataye namaḥ |
prāthana namaskāran samarpayāmi||

ॐ श्री महागणपतये नमः।
सर्वोपचार समस्त राजोपचार देवोपचार पूजां समर्पयामि ॥

oṁ śrī mahā gaṇapataye namaḥ| sarvopacāra| samasta rājopacāra| devopacāra pūjān samarpayāmi||

क्षोभनार्थे क्षेमाय पुनः आगमनाय च ॥

kṣobhanārthe kṣemāya punah āgamanāya ca ||

श्री काशी-विश्वनाथ-पूजा

śrī kāśī viśvanātha pūjā

कैलास शिखरे रम्ये शंकरस्य शिवालये ।
देवतास्तत्र मोदन्ते तन्मे मनश्शिवसंकल्पमस्तु ॥

kailāsa śikhare ramye śankarasya śivālye |
devtāstatra modante tanme manaśivasankalpamastu ||

(may my mind dwell on Lord Shiva, where (in Whom) at the beautiful Kailasa, the abode of Lord Śankara, all Gods are joyous)

आचमनीयम् (ācamanīyam)

ॐ अच्युताय नमः । om acyutāya namaḥ|

ॐ अनन्ताय नमः । om anantāya namaḥ|

ॐ गोविन्दाय नमः । om govindāya namaḥ|

केशव । नारायण । माधव । गोविन्द । विष्णु । मधुसूदन । त्रिविक्रम ।

वामन । श्रीधर । हृषीकेश । पद्मनाभ । दामोदर ॥

keśava| nārāyaṇa| mādhava| govinda| viṣṇu|
madhusūdana| trivikrama| vāmana| śrīdhara| hṛṣīkeśa|
padmanābha| dāmodara ||

श्री विघ्नेश्वर ध्यानम् (śrī vighneśvara dhyānam)

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥ श्री विघ्नेश्वरं ध्यायामि ॥

om śuklām baradharam viṣṇum śaśivarṇam caturbhujam|
prasannavadanam dhyāyet sarva vighnopaśāntaye||
śrī vighṇeśvarm dhyāyāmi.

प्राणायामः (prāṇāyāmaḥ)

ॐ भूः । ॐ भुवः । ॐ॰सुवः ।ॐ महः ।ॐ जनः ।ॐ तपः ।

ॐ॰ सत्यम् ॥

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

ॐ आपो ज्योतिरसोऽमृतं ब्रह्म भुर्भुव सुवरोम् ॥

om bhūḥ| om bhuvaḥ| ogm suvaḥ| om mahāḥ| om janaḥ|
om tapaḥ| ogm satyam |
om tatsaviturvareṇyam bhargo devasya dhīmahi |
dhiyo yo naḥ pracodayāt ||
omāpo jyotī raso'mṛtam brahma bhūrbhuva-ssuvarom ||

अथ पूजा सङ्कल्पः (atha pūjā sankalpaḥ)

ॐ ममोपात्त समस्त दुरित क्षयद्वारा श्री परमेश्वर प्रीत्यर्थं

शुभे शोभने मुहूर्ते अध्यब्रह्मणः द्वितीय परार्धे श्वेतवराह कल्पे

वैवस्वत मन्वन्तरे अष्टाविम्शति तमे कलियुगे प्रथमेपादे

ऐन्द्र-खण्डे कपिलारण्य प्रदेशे टस्टिन् नगर्यां चिन्मय रामेश्वर क्षेत्रे

शकाब्दे-अस्मिन् वर्तमाने व्यावहारिके प्रभवादीनां षष्ठि सम्वत्सराणां मध्ये

...

mamopātta samasta durita kṣhayadvārā śrī paramaeśwara
prītyartham śubhe śobhane muhūrte adhyabrahmaṇaḥ
dvitīya parārdhe śvetavarāha kalpe vaivaśvata manvantare
aśtāvimśati tame kaliyuge prathame pāde aindra khande
kapilāraṇya pradeśe cinmaya rameśwara kṣetre tustin
nagaryām śakābde asmin vaṛtamāne vyāvahārike
prabhavādinām śaṣti samvatsarāṇām madhye...

__________ नाम संवत्सरे nāma samvatsare

__________ अयने ayane

__________ ऋतौ ṛtau

__________ मासे māse

__________ पक्षे pakṣe

__________ शुभतिथौ śubhatithau

__________ वासरयुक्तायां vāsara yukthāyām

__________ नक्षत्र युक्तायां nakṣatra yuktāyām

शुभयोग शुभकरण सकल विशेषण विशिष्टायाम् अस्याम् वर्तमानायां

śubha-yoga śubha-karaṇa sakala-viśeṣaṇa viśistāyām asyām vaṛtamānāyām

__________ शुभतिथौ śubhatithau

आगतानां न-आगतानां सर्वेषां भक्तमहाजनानां ।

क्षेम स्थैर्य धैर्य वीर्य विजय अभय आयुः आरोग्य ऐश्वर्याणाम्

अभिवृद्ध्यर्थं ॥

धर्म अर्थ काम मोक्ष चतुर्विध पुरुषार्थ सिद्ध्यर्थम् ॥

धर्मानुकूल सकल मनोवाञ्छित फलप्राप्त्यर्थं ॥

समस्त दुरित-उपशान्त्यर्थं ॥

समस्त रोग पीडा परिहारद्वारा क्षिप्र आरोग्य सिद्ध्यर्थम् ॥

धन-दान्य अभिवृद्ध्यर्थं ॥

भक्ति ज्ञान विज्ञान अभिवृद्ध्यर्थं ॥

ज्ञान वैराग्य सिद्ध्यर्थं ॥

परस्पर प्रेम अभिवृद्ध्यर्थं ॥

समस्त सन्मंगल अवाप्त्यर्थं ॥

चिन्मय रामेश्वर आश्रम पुनः पनः अभिवृद्ध्यर्थं ॥

समस्तजन कल्याण प्राप्त्यर्थं ॥

श्री काशी विश्वनाथ स्वामि प्रसाद सिद्ध्यर्थं ॥

गुरुदेव श्री चिन्मयानन्द अनुग्रह प्राप्त्यर्थं ॥

श्री काशी विश्वनाथ स्वामि

यथा शक्ति ध्यान आवहनादि षोडष-उपचार पूजां करिष्ये ॥

āgatānām na-āgatānam sarveṣām bhakta mahājanānām| kṣema sthairya dhairya vīrya vijaya abhaya ayur-aroghya aiswaryaṇām abhivriddhyartham||dharma artha kāma mokṣa chaturvidha puruṣārtha siddhyartham|| dharmānukūla sakala mano-vāncita phala praptyartham|| samasta durita upaśāntyartham|| samasta roga pīdā parihāra-dvāra kṣipra-aroghya siddhyartham|| dhana dānya abhivriddhyartham|| bhakthi jñāna vijñāna abhivriddhyartham|| jñāna vairāgya abhivriddhyartham|| paraspara prema abhivṛddhyartham| samasta sanmangala avāptyartham| cinmaya rameśwara aśrama punaḥ punaḥ

abhivṛddhyartham| samasta jana kalyāṇa praptyartham|
śrī kāśī viśvanātha svāmi prasāda siddhyartham| gurudeva
śrī cinmayānanda anugraha prāptyartham| śrī kāśī
viśvanātha svāmi yathā śakti dhyāna āvāhanādi śodaṣa
upacāra pūjam kariṣye

{for pūja sponsors}
विशेषतः viśeṣtaḥ

________	गोत्रोत्भवस्य	gothrotbhavasya
________	नक्षत्रे	nakṣhatre
________	राशौ जातस्य	rasau jātasya
________	नामधेयस्य	nāmadheyasya (male)
________	नाम्न्याम्	nāmnyām(female)

अस्य यजमानस्य सह कुटुम्बानां
asya yajamānasya saha kutumbānām
{repeat above sankalpam}

तद् अङ्गं कलशपूजां च करिष्ये ॥
tadangam kalaśapūjam ca kariṣye
अप उपस्पर्श्या
apa-upasparśya (clean your palms)

अथ कलश पूजा (atha kalaśa pūjā)

कलशस्य मुखे विष्णुः कण्ठे रुद्र समाश्रितः।
मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः।
कुक्षौ तु सागरा सर्वे सप्त द्वीपा वसुन्धराः।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽथर्वणः।
अङ्गैश्च सहिताः सर्वैः कलशांबु समाश्रिताः।
गङ्गे च यमुने चैव गोदावरी सरस्वति
नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु।
सर्वे समुद्राः सरितः तीर्थानि च नदाः हृदाः।
आयान्तु देव देवी पूजार्थं दुरितक्षयकारकाः॥

kalaśasya mukhe viṣṇuh kante rudra samāśritah |
mūle tatra śito bramha madhye matruganā smrutāh |
kukṣautu sāgarā sarve sapta dvīpā vasundharāḥ|
rig vedo-atha yajuh-vedo sāma vedo atharvaṇah |
angaiśca sahita sarvaiḥ kalaśāmbū samāśritāh|
āyānthu deva pūjārtham durita-kṣaya kārakāḥ |
gange-ca yamune cai-vā godāvarī saraswatī, narmade
sindhu kāverī jales'min sannidhim kuru||

ॐ गङ्गायै नमः।यमुनायै नमः। गोदावर्यै नमः। सरस्वत्यै नमः। नर्मदायै
नमः।सिन्धवे नमः। कावेर्यै नमः॥ पुष्पैः पूजयामि॥

oṁ gangāyai namaḥ| yamunāyai namaḥ| godāvaryai namaḥ| saraswatyai namaḥ| narmadāyai namaḥ| sindhave namaḥ| kāveryai namaḥ|| puśpaih pūjayāmi||

ॐ आपोवा इदगं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृत-माप-स्सम्राडापो विराडाप-स्स्वराडाप-श्छन्दागुस्यापो ज्योतीगू-ष्यापो यजूगू-ष्याप-स्सत्यमाप-स्सर्वा देवता आपो भूर्भुव-स्सुव-राप ओम् ॥

oṁ āpo va idagm sarvam viśwā bhūtany-āpah prāṇā-vā āpah paśava-āpo-annam-āpo-amruthamāpah samrāḍ-āpo virāḍ-āpah svarād āpah chandhagmsyāpo jyotīgshya-āpo yajūgṣya-āpah satyam-āpah sarvā devatā āpo bhūrbhuvasuvara āpa om||

अथ शङ्ख पूजा (atha śankha pūjā)

त्वमं पुरा सागरोत्पन्नः विष्णुना विधृतः करे।
देवैश्च पूजितः सर्वैः पाञ्चजन्य नमोऽस्तु ते ॥
तत्पुरुषाय विद्महे पाञ्चजन्याय धीमहि । तन्नः शङ्ख प्रचोदयात् ॥
पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः शङ्ख प्रचोदयात् ॥
ॐ ब्रह्मणे नमः।ॐ विष्णवे नमः।ॐ शिवाय नमः ॥ ३
पूजा द्रव्याणि प्रोक्षय।आत्मानं च प्रोक्षय ॥

tvam purā sargardau-āpanno viṣṇunā vidhrutha kare|
devaischa pūjitaḥ sarvaih pānchajanya namostute|
tat-puruṣāya vidhmahe pānchajanyāya dhīmahi tannaḥ śankhaḥ prachodayāt.
pānchjanyāya vidhmahe pāvamānāya dhīmahi tannaḥ śankhaḥ prachodayāt..
oṁ brahmaṇe namaḥ| oṁ viṣṇave namaḥ| oṁ śivāya namaḥ|| - 3 times.
pūja dravyāṇi prokṣhya| ātmānam ca prokṣhya||

अथ आत्म पूजा (atha ātma pūjā)

देहो देवालयः प्रोक्तो जीवो देवः सनातनः।
त्यजेत् अज्ञान निर्माल्यं सोऽहं भावेन पूजयेत् ॥

deho devālaya prokto jīvo devaḥ sanātanaḥ|
tyajet- ajñāna nirmālyam so'ham bhāvena pūjayet||

अथ पीठ पूजा (atha pīta pūjā)

ॐ सकल-गुणात्मशक्तियुक्ताय योगपीठात्मने नमः।
oṁ sakala guṇātma śakthi-yuktāya yoga-pītātmane namaḥ|

आधार शक्त्यै नमः।	ādhāra śaktyai namaḥ|
मूल-प्रकृत्यै नमः।	mūla prakṛityai namaḥ|
आदि-वराहाय नमः।	ādi-varāhāya namaḥ|
आदि-कूर्माय नमः।	ādi kūrmāya namaḥ|

अनन्ताय नमः।	anantāya namaḥ।
पृथिव्यै नमः।	pṛthivyai namaḥ।
आदित्यादि-नवग्रह देवताभ्यो नमः।	ādityādi-navagraha devatābhyo namaḥ।
दश-दिग्पालकेभ्यो नमः॥	daśa-digpālakebhyo namaḥ।

अथ गुरुर्ध्यानम् (atha gururdhyānam)

ॐ श्री मातृभ्यो नमः।ॐ श्री पितृभ्यो नमः। ॐ श्री गुरुभ्यो नमः।
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरु स्साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः।
ॐ श्री चिन्मय सद्गुरवे नमः॥

oṁ śrī matṛbhyo namaḥ। oṁ śrī pitṛbhyo namaḥ।
oṁ śrī gurubhyo namaḥ।
gurur-brahmā gurur-viṣṇuh gurur devo maheśvaraḥ।
gurusākṣat param brahma tasmai śrī gurave namaḥ।
oṁ śrī cinmaya sadgurave namaḥ।।

अथ प्राणा प्रतिष्ठा (atha prāṇa pratiṣṭā)

For english script go to page 31

लघुन्यासः

ॐ अथात्मानगं् शिवात्मानग् श्रीरुद्ररूपं ध्यायेत्॥

शुद्धस्फटिकसंकाशं त्रिनेत्रं पञ्चवक्त्रकम्। गङ्गाधरं दशभुजं सर्वाभरणभूषितम्॥ नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम्। व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम्॥ कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम्। ज्वलन्तं पिङ्गलजटा-शिखामुद्योतधारिणम्॥ वृषस्कन्ध-समारूढं उमादेहार्ध-धारिणम्। अमृतेनाप्लुतं शान्तं दिव्यभोग-समन्वितम्॥ दिग्देवतासमायक्तं सुरासुरनमस्कृतम्। नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्॥ सर्वव्यापिन-मीशानं रुद्रं वै विश्वरूपिणम्। एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत्॥

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः। आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासा देवाभिमुखः स्थित्वा आत्मनि देवताः स्थापयेत्॥

प्रजनने ब्रह्मा तिष्ठतु। पादयोर्विष्णुस्तिष्ठतु। हस्तयोर्हरस्तिष्ठतु। बाह्वोरिन्द्रस्तिष्ठतु। जठरेऽग्निस्तिष्ठतु। हृदये शिवस्तिष्ठतु। कण्ठे वसवस्तिष्ठन्तु। वक्त्रे सरस्वती तिष्ठतु। नासिकयोर्वायुस्तिष्ठतु। नयनोस्चन्द्रादित्यौ तिष्ठेताम्। कर्णयोरश्विनौ तिष्ठेताम्। ललाटे

रुद्रास्तिष्ठन्तु। मूर्ध्न्यादित्यास्तिष्ठन्तु। शिरसि महादेवस्तिष्ठतु। शिखायां वामदेवस्तिष्ठतु। पृष्ठे पिनाकी तिष्ठतु। पुरतः शूली तिष्ठतु। पार्श्वयोः शिवाशङ्करौ तिष्ठेताम्। सर्वतो वायुस्तिष्ठतु। ततो बहिः सर्वतोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठतु। सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु। मागं् रक्षन्तु। सर्वेशां भक्तमहाजनानं सह कुटुम्भानां रक्षन्तु॥

अग्निर्मे वाचि श्रितः। वाग्धृदये। हृदयं मयी। अहममृते। अमृतं ब्रह्मणि। वायुर्मे प्राणे श्रितः। प्राणो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। चन्द्रमा मे मनसि श्रितः। मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। दिशो मे श्रोत्रे श्रिताः। श्रोत्रगं् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। आपो मे रेतसि श्रिताः। रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पृथिवी मे शरीरे श्रिताः। शरीरगं् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। इन्द्रो मे बले श्रितः। बलगं् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। आत्मा म आत्मनि श्रितः। आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पुनर्म आत्मा पुनरायुरागात्।

पुनः प्राणः पुनराकूतमागात्। वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः॥

अस्य श्री रुद्राध्यायप्रश्नमहामन्त्रस्य अघोर ऋषिः। अनुष्टुप् छन्दः। सङ्कर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता। नमः शिवायेति बीजम्। शिवतरायेति शक्तिः। महादेवायेति कीलकम्। श्रीसाम्बसदाशिव प्रसादसिद्ध्यर्थे जपे विनियोगः॥

ॐ अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः। दर्शपूर्णमासात्मने तर्जनीभ्यां नमः। चातुर्मास्यात्मने मध्यमाभ्यां नमः। निरूढपशुबन्धात्मने अनामिकाभ्यां नमः। ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः। सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः॥ अग्निहोत्रात्मने हृदयाय नमः। दर्शपूर्णमासात्मने शिरसे स्वाहा। चातुर्मास्यात्मने शिखायै वषट्। निरूढपशुबन्धात्मने कवचाय हुं। ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट्। सर्वक्रत्वात्मने अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्धः॥

ध्यानम्

आपाताळ-नभः स्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुरज्ज्योतिः
स्फाटिक-लिङ्ग-मौळि-विलसत्पूर्णेन्दु-वान्तामृतैः।

अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानुवाकाञ्जपन् ध्याये-दीप्सित-सिद्धये
ध्रुवपदं विप्रोऽभिषिञ्चे-च्छिवम्॥

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः कण्ठे कालाः
कपर्दाकलित-शशिकला-श्चण्डकोदण्डहस्ताः ।

त्र्यक्षा रुद्राक्षामालाः प्रकटितविभवाः शाम्भवा मूर्तिभेदा रुद्राः
श्रीरुद्रसूक्त-प्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

ॐ गणानां त्वा गणपतिगूं हवामहे कविं कवीना-मुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥
ॐ श्री महागणपतये नमः ॥

शान्तिपाठः चमकप्रश्नः – ३ अनुवाक

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ३ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

continued on page 35

laghunyāsaḥ

om athātmānagṁ śivātmānag śrīrudrarūpaṁ dhyāyet ||
śuddhasphaṭikasaṅkāśaṁ trinetraṁ pañcavaktrakam |
gaṅgādharaṁ daśabhujaṁ sarvābharaṇabhūṣitam ||
nīlagrīvaṁ śaśāṅkāṅkaṁ nāgayajñopavītinam |
vyāghracarmottarīyaṁ ca vareṇyamabhaya-pradam ||
kamaṇḍalvakṣasūtrāṇāṁ dhāriṇaṁ śūlapāṇinam |
jvalantaṁ piṅgalajaṭā-śikhāmudyotadhāriṇam
||vṛṣaskandha-samārūḍham umādehārdha-dhāriṇam |
amṛtenāplutaṁ śāntaṁ divyabhoga-samanvitam ||
digdevatāsamāyuktaṁ surāsuranamaskṛtam | nityaṁ ca
śāśvataṁ śuddhaṁ dhruvamakṣaramavyayam ||
sarvavyāpina-mīśānaṁ rudraṁ vai viśvarūpiṇam | evaṁ
dhyātvā dvijassamyak tato yajanamārabhet ||

athāto rudrasnānārcanābhiṣekavidhiṁ vyākhyāsyāmaḥ |
ādita eva tīrthe snātvā udetya śuciḥ prayato brahmacārī
śuklavāsā devābhimukhaḥ sthitvā ātmani devatāḥ
sthāpayet ||

prajanane brahmā tiṣṭhatu | pādayorviṣṇustiṣṭhatu |
hastayorharastiṣṭhatu | bāhvorindrastiṣṭhatu |
jaṭhare'gnistiṣṭhatu | hṛdaye śivastiṣṭhatu | kaṇṭhe
vasavastiṣṭhantu | vaktre sarasvatī tiṣṭhatu |
nāsikayorvāyustiṣṭhatu | nayanoscandrādityau tiṣṭhetām |
karṇayoraśvinau tiṣṭhetām | lalāṭe rudrāstiṣṭhantu |

mūrdhnyādityāstiṣṭhantu | śirasi mahādevastiṣṭhatu | śikhāyāṁ vāmadevastiṣṭhantu | pṛṣṭhe pinākī tiṣṭhatu | purataḥ śūlī tiṣṭhatu | pārśvayoḥ śivāśaṅkarau tiṣṭhetām | sarvato vāyustiṣṭhatu | tato bahiḥ sarvato'gnirjvālāmālā-parivṛtastiṣṭhatu | sarveṣvaṅgeṣu sarvā devatā yathāsthānaṁ tiṣṭhantu | māgṁ rakṣantu ||

agnirme vāci śritaḥ | vāgdhṛdaye | hṛdayaṁ mayī | ahamamṛte | amṛtaṁ brahmaṇi | vāyurme prāṇe śritaḥ | prāṇo hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | sūryo me cakṣuṣi śritaḥ | cakṣurhṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | candramā me manasi śritaḥ | mano hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | diśo me śrotre śritaḥ | śrotragṁ hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | āpo me retasi śritāḥ | reto hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | pṛthivī me śarīre śritāḥ | śarīragṁ hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | oṣadhivanaspatayo me lomasu śritāḥ | lomāni hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | indro me bale śritaḥ | balagṁ hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | parjanyo me mūrdhni śritaḥ | mūrdhā hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | īśāno me manyau śritaḥ | manyurhṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ

brahmaṇi | ātmā ma ātmani śritaḥ | ātmā hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | punarma ātmā punarāyurāgāt | punaḥ prāṇaḥ punarākūtamāgāt | vaiśvānaro raśmibhirvāvṛdhānaḥ | antastiṣṭhatvamṛtasya gopāḥ ||

asya śrī rudrādhyāyapraśnamahāmantrasya aghora ṛṣiḥ | anuṣṭup-chandaḥ | saṅkarṣaṇamūrtisvarūpo yo'sāvādityaḥ paramapuruṣaḥ sa eṣa rudro devatā | namaḥ śivāyeti bījam | śivatarāyeti śaktiḥ | mahādevāyeti kīlakam | śrīsāmbasadāśiva-prasādasiddhyarthe jape viniyogaḥ ||

om agnihotrātmane aṅguṣṭhābhyāṁ namaḥ | darśapūrṇamāsātmane tarjanībhyāṁ namaḥ | cāturmāsyātmane madhyamābhyāṁ namaḥ | nirūḍhapaśubandhātmane anāmikābhyāṁ namaḥ | jyotiṣṭomātmane kaniṣṭhikābhyāṁ namaḥ | sarvakratvātmane karatalakarapṛṣṭhābhyāṁ namaḥ || agnihotrātmane hṛdayāya namaḥ | darśapūrṇamāsātmane śirase svāhā | cāturmāsyātmane śikhāyai vaṣaṭ | nirūḍhapaśubandhātmane kavacāya huṁ | jyotiṣṭomātmane netratrayāya vauṣaṭ | sarvakratvātmane astrāya phaṭ | bhūrbhuvassuvaromiti digbandhaḥ ||

dhyānam

āpātāḻa-nabhaḥ sthalānta-bhuvana-brahmāṇḍa-māvisphura-jjyotiḥ sphāṭika-liṅga-mauḻi-vilasatpūrṇendu-vāntāmṛtaiḥ |

astokāpluta-meka-mīśa-maniśaṁ rudrānuvākāñjapan dhyāye-dīpsati-siddhaye dhruvapadaṁ vipro'bhiṣiñce-cchivam ||

brahmāṇḍavyāptadehā bhasitahimarucā bhāsamānā bhujaṅgaiḥ kaṇṭhe kālāḥ kapardākalita-śaśikalā-ścaṇḍakodaṇḍahastāḥ |

tryakṣā rudrākṣāmālāḥ prakaṭitavibhavāḥ śāmbhavā mūrtibhedā rudrāḥ śrīrudrasūkta-prakaṭitavibhavā naḥ prayacchantu saukhyam ||

om gaṇānāṁ tvā gaṇapatigṁ havāmahe kaviṁ kavīnā-mupamaśravastamam | jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ā naḥ śṛṇvannūtibhissīda sādanam || oṁ śrī mahāgaṇapataye namaḥ ||

camakapraśnaḥ - 3 anuvāka

śaṁ ca me mayaśca me priyaṁ ca me'nukāmaśca me kāmaśca me saumanasaśca me bhadraṁ ca me śreyaśca me vasyaśca me yaśaśca me bhagaśca me draviṇaṁ ca me yantā ca me dhartā ca me kṣemaśca me dhṛtiśca me viśvaṁ ca me mahaśca me saṁvicca me jñātraṁ ca me sūśca me prasūśca me sīraṁ c me layaśca ma ṛtaṁ cca me'mṛtaṁ ca me'yakṣmaṁ ca me'nāmayacca me jīvātuśca me dīrghāyutvaṁ ca me'namitraṁ ca me'bhayaṁ ca me sugaṁ ca me śayanaṁ ca me sūṣā ca me sudinaṁ ca me || 3 ||

om śāntiḥ śāntiḥ śāntiḥ ||

अथ प्राणा प्रतिष्ठा (atha prāna prathiṣṭā-contd)

अस्यां मूर्तौ जीवः-तिष्ठतु। अस्यां मूर्तौ सर्वेन्द्रियाणि मनस् त्वक् चक्षुः श्रोत्र जिह्वा घ्राण वाक् पाणि पाद-पायु-उपस्तानि प्राण अपान व्यान उदान समानास्चागत्य सुखम् चिरम् तिष्ठन्तु स्वाहा ॥

असूनिते पुनरस्मासु चक्षुः पुनः प्राणमिह नो देहि भोगम्। ज्योक् पश्येम सूर्य-मुच्चरन्त-मनुमते मृलया नः स्वस्ति ॥

पञ्चदश संस्कारार्थं पञ्चदशवारम् ॐ नमः शिवाय जपं कृत्वा ॥

asyām mūrtau jivaḥ-tiṣthatu| asyām mūrtau sarve-indriyāṇi| manas-tvak-chakṣuḥ-śrotra-jihvā-ghrāṇa-vāk-

pāṇi-pāda-pāyu-upastāni| prāṇa apāna vyāna udhāna samānāscāgatya sukham ciram tiṣthantu svāhā||

asūnite punarasmāsu cakṣuḥ punaḥ prāṇa-mihano dehi bhogam| jyokh-paśyema sūrya muccaranta-manumate-mrulayā naḥ svastiḥ||

chant oṁ namaḥ śivāya 15 times

आवाहितो भव । āvāhito-bhava|

स्थापितो भव । sthāpito-bhava|

सन्निहितो भव । sannihito-bhava|

सन्निरुद्धो भव । sanniruddho-bhava|

अवकुण्ठितो भव । avakunṭhito-bhava|

सुप्रीतो भव । suprīto-bhava|

सुप्रसन्नो भव । suprasanno-bhava|

सुमुखो भव । sumukho-bhava|

वरदो भव । varado-bhava|

प्रसीद प्रसीद । prasīda prasīda|

स्वामिन् सर्व जगन्नाथ यावत् पूजा-अवसानकं तावत्-त्वम् प्रीति भावेन लिङ्गेऽस्मिन् सन्निधिम् कुरु ॥

svāmin sarva jagannatha yāvat-pūja-avasānakam tāvat-tvam prīti bhāvena linge'smin sannidhim kurū||

अथ अनुज्ञाः (atha anujñyāḥ)

नन्दीश्वर नमस्तुभ्यं सांभानन्द प्रदायक

महादेवस्य सेवार्थम् अनुज्ञां दातुमर्हसि ॥

nandikeśvara namastubhyam sāmbhānanda pradāyaka|
mahādevasya sevārtham anujñām dātumarhasi||

अथ ध्यानम् (atha dhyānam)

ध्यायामि दक्षिणामूर्तिं नीलग्रीवं त्रिलोचनम् ।

गंगाधरम्-उमाकान्तं नित्य-कल्याणरुपिणम् ॥

गोक्षीरधवळाकारं चन्द्रबिंब-समाननम् ।

भस्मभूषिवसर्वाङ्गं रुद्राक्षाभरणान्वितम् ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । ध्यायामि ॥

dhyāyāmi dakṣiṇāmūrtim nīlagrīvam trilocanam|
gangādharam umākāntam nitya kalyāṇa rūpiṇam|
gokṣīra-dhavaḷākāram chandra-bimba samānanam|
bhasmabhūṣita sarvāngam rudrākṣa-ābharaṇānvitam|
oṁ śrī kāsī viśvanātha svāmine namaḥ | dhyāyāmi||

अथ आवाहनम् (atha āvāhanam)

एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरुढ ।

देवादिदेवेश महेश नित्यं गृहाण पूजां भगवन् नमस्ते ॥

आवाहयामि देवेशम् आदि-मध्यान्त-वर्जितम् ।

आधारं सर्व-लोकानाम् आश्रितार्थ-प्रदायिनम् ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । आवाहयामि ॥

yehyehi gaurīśa pinākapāṇe śaśānka-maule
vriśabhādhirūda| devādideveśa maheśa nityam grahāṇa
pūjam bhagavan namaste| āvāhayāmi deveśam ādi-
madhyāntha varjitam| ādhāram sarva lokānām āśritārtha
pradāyinam||
oṁ śrī kāsī viśvanātha svāmine namaḥ | āvāhayāmi||

अथ आसनम् (atha āsanam)

ॐ विश्वात्मने नमस्तुभ्यं चिदम्बर-निवासिने ।

रत्नसिंहासनं चारु ददामि करुणा-निधे ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । आसनार्थं पुष्पं समर्पयामि ॥

viśvātmane namatubhyam cidambhara nivāsine|
ratna-simhāsanam chāru dadhāmi karuṇā-nidhe||
oṁ śrī kāsī viśvanātha svāmine namaḥ | āsanārtham
puṣpam samarpayāmi||

अथ पाद्यं (atha pādhyam)

पाद्यं गृहाण भगवन् पावनं परमेश्वर ।

पार्वती-हृदयानन्द पापं सर्वं व्यपोहय ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । पादयोः पाद्यं समर्पयामि ॥

pādyam grahāṇa bhagavan pāvanam parameśwara|
pārvatī hridayānanda pāpam sarvam vyapohaya||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
pādayoḥ pādyam samarpayāmi||

अथ अर्घ्यम् (atha arghyam)

अर्घ्यं गृहाण गिरीश गन्धपुष्पाक्षतैर्युतम् ।

अघमज्ञानमखिलं नीलकण्ठ निवारय ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।हस्तयोः अर्घ्यं समर्पयामि ॥

arghyam grahāṇa girīśa gandha-puṣpā-akṣhathairyutam.
agham-ajñānamakhilam nīlakanta nivārayā
oṁ śrī kāsī viśvanātha svāmine namaḥ |
hastayoḥ arghyam samarpayāmi||

अथ आचमनम् (atha ācamanam)

गृहाणाचमनार्थाय गंगादिसरिदाहृतम्।

विमलं जलमीशान व्याधीन्मे विनिवारय॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । मुखे आचमनीयं समर्पयामि॥

grahāṇ-āchamanārthāya gangādi-saridāhritam|
vimalam jalamīśāna vyadhīnme vinivāraya||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
mukhe āchamanīyam samarpayāmi||

अथ पञ्चामृतम् (atha paṅchāmṛutam)

पञ्चामृतं गृहाणेदं पन्नगेश्वर-भूषण।

पञ्चवक्त्र नमस्तुभ्यं पञ्च-पापानि नाशय॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः। पञ्चामृतं समर्पयामि॥

paṅcāmrutam grahāṇedam pannageśwara bhūṣaṇa| paṅca-vaktra namastubhyam paṅca pāpāni nāśaya||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
paṅcāmṛtam samarpayāmi||

अथ स्नानीयम् (atha snānīyam)

गङ्गा-क्लिन्न-जटाभार सोम सोमार्ध-शेखर।

सह्यजादि-सरित्तोयैः स्नानं कुरु सदाशिव॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः। स्नानीयं समर्पयामि॥

स्नानन्तरं आचमनीयं सर्मपयामि॥

gangā-klinna jatābhāra soma somārdha śekara|
sahya-jādi saritoyaih snānam kuru sadāśiva||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
snānīyam samarpayāmi| snānānantaram ācamanīyam samarpayāmi||

अथ अभिषेकः (atha abhiṣekah)

ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः॥ - 3 times

oṁ namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya tripurāntakāya trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ | - 3 times

ॐ त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्। - 3 times

oṁ tryambakaṁ yajāmahe sugandhiṁ puṣṭivardhanam |
urvārukamiva bandhanānmṛtyo-rmukṣīya mā'mṛtāt ||
- 3 times. *{for English script go to page 54}*

श्री रुद्रप्रश्नः

ॐ नमो भगवते रुद्राय ॥

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः। या त इषुः शिवतमा शिवमं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय। या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तनुवा शन्तमया गिरिशन्ताभिचाक्शीहि। यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत्। शिवेन वचसा त्वा गिरिशाच्छावदामसि। यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत्। अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः। असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः। ये चेमाꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे। असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः। नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः। प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप। अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव। विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत। अनेशन्नस्येषव आभुरस्य निषङ्गथिः। या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज। नमस्ते अस्त्वायुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो

बाहुभ्याम् तव धन्वने। परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥१॥ शम्भवे नमः।

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः।

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशयोपवीतिने पुष्टाणं पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नम स्सूतायाहन्त्याय वनानां पतये नमो नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणं पतये नमो नमो भुवंतये वारिवस्कृधायौषधीनां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनाम् पतये नमो नमः कृत्स्नवीताय धावते सत्वनां पतये नमः ॥२॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये नमो नम

उष्णीषिने गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वाविभ्यश्च
वो नमो नम आतन्वानेभ्य प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो
विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः
शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो
धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो
अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥३॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम
उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो
नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो
नमो विरूपेभ्यो विश्वरुपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो
नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो रथपतिभ्यश्च वो नमो नमः
सेनाभ्यः सेनानिभ्यश्च वो नमो नमः , क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कमारेभ्यश्च वो नमो
नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो
नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो
नमः ॥४॥

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च
शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च
शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च
संवृद्ध्वने च नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः
शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय
च द्वीप्याय च ॥५॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय
चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च
प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च
नमः श्लोक्याय चाऽवसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय
च प्रतिश्रवाय च नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते
च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च
श्रुतसेनाय च ॥ ६ ॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च
प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः
स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च
नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः
कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च
विद्युत्याय च नम ईध्रियाय चातप्याय च नमो वात्याय च रेष्मियाय च
नमो वास्तव्याय च वास्तुपाय च ॥ ७ ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च
पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो
हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च
मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च
नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय
चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च
नमः सिकत्याय च प्रवाह्याय च ॥ ८ ॥

नम इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय च क्षयणाय च नमः
कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च
गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च
नमः पाꣳसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो
लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च
पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते च
प्रख्खिदते च नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो
नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥ ९ ॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणामेषां पशूनां मा
भेर्माऽरो मो एषां किंचनाममत् । या ते रुद्र शिवा तनूः शिवा विश्वाह
भेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे । इमाꣳ रुद्राय तवसे
कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं

पुष्टं ग्रामे अस्मिन्ननातुरम् । मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा
विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ । मा
नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा
नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः । मानस्तोके
तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र
भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते । आरात्ते गोघ्न उत पूरुषघ्ने
क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म
यच्छ द्विबर्हाः । स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः । परिणो रुद्रस्य
हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृडय । मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ।
विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ
हेतयोन्यमस्मन्निवपन्तु ताः । सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥१० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाꣳ सहस्रयोजनेऽवधन्वानि
तन्मसि । अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि । नीलग्रीवाः
शितिकण्ठाः शर्वा अधः क्षमाचराः । नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा
उपश्रिताः । ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः ।
ये भूतानामधिपतयो विशिखासः कपर्दिनः । ये अन्नेषु विविध्यन्ति पात्रेषु

पिबतो जनान्। ये पथां पथिरक्षय ऐलबृदा यव्युधः। ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः। य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे। तेषाꣳ सहस्र योजनेऽवधन्वानि तन्मसि। नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥११॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योभर्मुक्षीय माऽमृतात्। यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु। तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य। यक्ष्वामहे सौमनसाय रुद्रं नभोभिर्देवमसुरं दुवस्य। अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयꣳ शिवाभिमर्शनः। ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान् यज्ञस्य मायया सर्वानव यजामहे। मृत्यवे स्वाहा मृत्यवे स्वाहा। ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि॥ प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाप्यायस्व॥ नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥
॥ ॐ शान्तिः शान्तिः शान्तिः॥

चमकप्रश्नः – ३ अनुवाका

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च् मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥ ३॥
ॐ शान्तिः शान्तिः शान्तिः॥

दुर्गासूक्तम्

ॐ ॥ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः। स न पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीगुं शरणमहं प्रपद्ये सुतरसि तरसे नम ॥ अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्॥ पृतना जितगुं सहमानमुग्रमग्निगं हुवेम परमाथ्सधस्थात्। स नः पर्षदति दुर्गाणि विश्वा क्षामहेवो अति दुरिताऽत्यग्निः॥ प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि। स्वाश्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णो-रनुसंचरेम। नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम्॥

ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्॥
ॐ शान्तिः शान्तिः शान्तिः॥

पुरुषसूक्तम्

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्। पुरुष एवेदꣳ सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः॥ १॥

पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः। ततो विश्वङ्खेव्यक्रामत्। साशनानशने अभि। तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः॥२॥

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः। सप्तास्यासन्परिधयः। त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः॥३॥

तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्। पशूꣳस्ताꣳश्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये। तस्माद्यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत॥४॥

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं

किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ॥५॥

ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन् ॥६॥

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्, यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥७॥

अद्भ्यः संभूतः पृतिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ॥८॥

तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेदसः ॥
यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः ।

नमो रुचाय ब्राह्मये । रुचं ब्राह्मम् जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ॥९॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टम् मनिषाण । अमुं मनिषाण । सर्वम् मनिषाण ॥१०॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

continued on page 67

śrī rudra-praśnaḥ

om namo bhagavate rudrāya ||

om namaste rudra manyava utota iṣave namaḥ | namaste
astu dhanvane bāhubhyāmuta te namaḥ | yā ta iṣuḥ
śivatamā śivam babhūva te dhanuḥ | śivā śaravyā yā tava
tayā no rudra mṛḍaya | yā te rudra śivā
tanūraghorā'pāpakāśinī | tayā nastanuvā śantamayā
giriśantābhicākaśīhi | yāmiṣuṁ giriśanta haste
bibharṣyastave | śivāṁ giritra tāṁ kuru mā hiṁsīḥ
puruṣaṁ jagat | śivena vacasā tvā giriśācchāvadāmasi |
yathā naḥ sarvamijjagadayakṣmaṁ sumanā asat |
adhyavocadadhivaktā prathamo daivyo bhiṣak |ahīṁśca
sarvāñjambhayantsarvāśca yātudhānyaḥ | asau yastamro
aruṇa uta babhruḥ sumaṅgalaḥ | ye cemāṁ rudrā abhito
dikṣu śritāḥ sahasraśo'vaiṣāṁ heḍa īmahe| asau
yo'vasarpati nīlagrīvo vilohitaḥ| utainaṁ gopā
adṛśannadṛśannudahāryaḥ | utainaṁ viśvā bhūtāni sa
dṛṣṭo mṛḍayāti naḥ | namo astu nīlagrīvāya sahasrākṣāya
mīḍhuṣe | atho ye asya satvāno'haṁ tebhyo'karan namaḥ|
pramuñca dhanvanastva-mubhayorārtniyorjyām | yāśca te
hasta iṣavaḥ parā tā bhagavo vapa | avatatya dhanustavaṁ
sahasrākṣa śateṣudhe | niśīrya śalyānāṁ mukhāa śivo naḥ
sumanā bhava | vijyaṁ dhanuḥ kapardino viśalyo
bāṇavāṁ uta| aneśannasyeṣava ābhurasya niṣaṅgathiḥ | yā

te hetirmīḍhuṣṭama haste babhūva te dhanuḥ | tayā'smān
viśvatastvamayakṣmayā paribbhuja | namaste
astvāyudhāyānātatāya dhṛṣṇave | ubhābhyāmuta te namo
bāhubhyām tava dhanvane | pari te dhanvano
hetirasmānvṛṇaktu viśvataḥ| atho ya iṣudhistavāre
asmannidhehi tam ||1||

śambhave namaḥ |
namaste astu bhagavanviśveśvarāya mahādevāya
tryambakāya tripurāntakāya trikāgnikālāya kālāgnirudrāya
nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya sadāśivāya
śrīmanmahādevāya namaḥ |

namo hiraṇyabāhave senānye diśāṁ ca pataye namo namo
vṛkṣebhyo harikeśebhyaḥ paśūnāṁ pataye namo namaḥ
saspiñjarāya tviṣīmate pathīnāṁ pataye namo namo
babhluśāya vivyādhine'nnānāṁ pataye namo namo
harikeśyopavītine puṣṭānaṁ pataye namo namo bhavasya
hetyai jagatāṁ pataye namo namo rudrāyātatāvine
kṣetrāṇāṁ pataye namo namassūtāyāhantyāya vanānāṁ
pataye namo namo rohitāya sthapataye vṛkṣāṇāṁ pataye
namo namo mantriṇe vāṇijāya kakṣāṇaṁ pataye namo
namo bhuvantaye vārivaskṛdhāyauṣadhīnāṁ pataye namo
nama uccairghoṣāyākrandayate pattīnām pataye namo
namaḥ kṛtsnavītāya dhāvate satvanāṁ pataye namaḥ ||2||

namaḥ sahamānāya nivyādina āvyādhinīnāṁ pataye namo
namaḥ kakubhāya niṣaṅgiṇe stenānāṁ pataye namo namo
niṣaṅgiṇa iṣudhimate taskarāṇāṁ pataye namo namo
vañcate parivañcate stāyūnāṁ pataye namo namo nicerave
paricarāyāraṇyānāṁ pataye namo namaḥ sṛkāvibhyo
jighāṁsadbhyo muṣṇatāṁ pataye namo namo'simadbhyo
naktañcaradbhyaḥ prakṛntānāṁ pataye namo nama
uṣṇīṣiṇe giricarāya kuluñcānāṁ pataye namo nama
iṣumadbhyo dhanvāvibhyaśca vo namo nama
ātanvānebhya pratidadhānebhyaśca vo namo nama
āyacchadbhyo visṛjadbhyaśca vo namo namo'syadbhyo
vidhyadbhyaśca vo namo nama āsīnebhyaḥ śayānebhyaśca
vo namo namaḥ svapadbhyo jāgradbhyaśca vo namo
namastiṣṭhadbhyo dhāvadbhyaśca vo namo namaḥ
sabhābhyaḥ sabhāpatibhyaśca vo namo namo
aśvebhyo'śvapatibhyaśca vo namaḥ ||3||

nama āvyadhinībhyo vividhyantībhyaśca vo namo nama
ugaṇābhyastṛṁhatībhyaśca vo namo namo gṛtsebhyo
gṛtsapatibhyaśca vo namo namo vrātebhyo
vrātapatibhyaśca vo namo namo gaṇebhyo
gaṇapatibhyaśca vo namo namo virūpebhyo
viśvarupebhyaśca vo namo namo mahadbhyaḥ
kṣullakebhyaśca vo namo namo rathibhyo'rathebhyaśca vo
namo namo rathebhyo rathapatibhyaśca vo namo namaḥ

senābhyaḥ senanibhyaśca vo namo namaḥ kṣattṛbhyaḥ
saṅgrahītṛbhyaśca vo namo namastakṣabhyo
rathakārebhyaśca vo namo namaḥ kulālebhyaḥ
karmārebhyaśca vo namo namaḥ puñjiṣṭebhyo
niṣādebhyaśca vo namo nama iṣukṛdbhyo
dhanvakṛdbhyaśca vo namo namo mṛgayubhyaḥ
śvanibhyaśca vo namo namaḥ śvabhyaḥ śvapatibhyaśca vo
namaḥ ||4||

namo bhavāya ca rudrāya ca namaḥ śarvāya ca paśupataye
ca namo nīlagrīvāya ca śitikaṇṭhāya ca namaḥ kapardine ca
vyuptakeśāya ca namaḥ sahasrākṣāya ca śatadhanvane ca
namo giriśāya ca śipiviṣṭāya ca namo mīḍhuṣṭamāya
ceṣumate ca namo hrasvāya ca vāmanāya ca namo bṛhate
ca varṣīyase ca namo vṛddhāya ca saṁvṛdvane ca namo
agriyāya ca prathamāya ca nama āśave cājirāya ca namaḥ
śīghriyāya ca śībhyāya ca nama ūrmyāya cāvasvanyāya ca
namaḥ srotasyāya ca dvīpyāya ca ||5||

namo jyeṣṭhāya ca kaniṣṭhāya ca namaḥ pūrvajāya
cāparajāya ca namo madhyamāya cāpagalbhāya ca namo
jaghanyāya ca budhniyāya ca namaḥ sobhyāya ca
pratisaryāya ca namo yāmyāya ca kṣemyāya ca nama
urvaryāya ca khalyāya ca namaḥ ślokyāya cā'vasānyāya ca
namo vanyāya ca kakṣyāya ca namaḥ śravāya ca
pratiśravāya ca nama āśuṣeṇāya cāśurathāya ca namaḥ

śūrāya cāvabhindate ca namo varmiṇe ca varūthine ca
namo bilmine ca kavacine ca namaḥ śrutāya ca
śrutasenāya ca || 6||

namo dundubhyāya cāhananyāya ca namo dhṛṣṇave ca
pramṛśāya ca namo dūtāya ca prahitāya ca namo niṣaṅgiṇe
ceṣudhimate ca namastīkṣṇeṣave cāyudhine ca namaḥ
svāyudhāya ca sudhanvane ca namaḥ srutyāya ca pathyāya
ca namaḥ kāṭyāya ca nīpyāya ca namaḥ sūdyāya ca
sarasyāya ca namo nādyāya ca vaiśantāya ca namaḥ
kūpyāya cāvaṭyāya ca namo varṣyāya cāvarṣyāya ca namo
meghyāya ca vidyutyāya ca nama īdhriyāya cātapyāya ca
namo vātyāya ca reṣmiyāya ca namo vāstavyāya ca
vāstupāya ca || 7||

namaḥ somāya ca rudrāya ca namastāmrāya cāruṇāya ca
namaḥ śaṅgāya ca paśupataye ca nama ugrāya ca bhīmāya
ca namo agrevadhāya ca dūrevadhāya ca namo hantre ca
hanīyase ca namo vṛkṣebhyo harikeśebhyo namastārāya
namaśśambhave ca mayobhave ca namaḥ śaṅkarāya ca
mayaskarāya ca namaḥ śivāya ca śivatarāya ca
namastīrthyāya ca kūlyāya ca namaḥ pāryāya cāvāryāya ca
namaḥ prataraṇāya cottaraṇāya ca nama ātāryāya
cālādyāya ca namaḥ śaṣpyāya ca phenyāya ca namaḥ
sikatyāya ca pravāhyāya ca || 8||

nama iriṇyāya ca prapathyāya ca namaḥ kiṁśilāya ca
kṣayaṇāya ca namaḥ kapardine ca pulastaye ca namo
goṣṭhyāya ca gṛhyāya ca namastalpyāya ca gehyāya ca
namaḥ kāṭyāya ca gahvareṣṭhāya ca namo hradayyāya ca
niveṣpyāya ca namaḥ pāṁsavyāya ca rajasyāya ca namaḥ
śuṣkyāya ca harityāya ca namo lopyāya colapyāya ca nama
ūrvyāya ca sūrmyāya ca namaḥ parṇyāya ca parṇaśadyāya
ca namo'paguramāṇāya cābhighnate ca nama ākhkhidate
ca prakhkhidate ca namo vaḥ kirikebhyo devānāṁ
hṛdayebhyo namo vikṣīṇakebhyo namo vicinvatkebhyo
nama ānirhatebhyo nama āmīvatkebhyaḥ || 9||

drāpe andhasaspate daridrannīlalohita | eṣāṁ
puruṣāṇāmeṣāṁ paśūnāṁ mā bhermā'ro mo eṣāṁ
kiñcanāmamat | yā te rudra śivā tanūḥ śivā viśvāha bheṣajī
| śivā rudrasya bheṣajī tayā no mṛḍa jīvase | imāṁ rudrāya
tavase kapardine kṣayadvīrāya prabharāmahe matim||
yathā naḥ śamasaddvipade catuṣpade viśvaṁ puṣṭaṁ
grāme asminnanāturam | mṛḍā no rudrota no mayaskṛdhi
kṣayadvīrāya namasā vidhema te | yacchaṁ ca yośca
manurāyaje pitā tadaśyāma tava rudra praṇītau | mā no
mahāntamuta mā no arbhakaṁ mā na ukṣanta-muta mā na
ukṣitam | mā no'vadhīḥ pitaraṁ mota mātaraṁ priyā mā
nastanuvo rudra rīriṣaḥ | mānastoke tanaye mā na āyuṣi
mā no goṣu mā no aśveṣu rīriṣaḥ | vīrānmā no rudra

bhāmito'vadhī-rhaviṣmanto namasā vidhema te | ārātte goghna uta pūruṣaghne kṣayadvīrāya sumnamasme te astu | rakṣā ca no adhi ca deva brūhyadhā ca naḥ śarma yaccha dvibarhāḥ | stuhi śrutaṁ gartasadaṁ yuvānaṁ mṛganna bhīma-mupahatnumugram | mṛḍā jaritre rudra stavāno anyante asmannivapantu senāḥ | parino rudrasya hetirvṛṇaktu pari tveṣasya durmatiraghāyoḥ | ava sthirā maghavadbhyastanuṣva mīḍhvastokāya tanayāya mṛuḍaya | mīḍhuṣṭama śivatama śivo naḥ sumanā bhava | parame vṛkṣa āyudhannidhāya kṛttiṁ vasāna ācara pinākaṁ bibhradāgahi | vikirida vilohita namaste astu bhagavaḥ | yāste sahasraṁ hetayonyamasmannivapantu tāḥ | sahasrāṇi sahasradhā bāhuvostava hetayaḥ | tāsāmīśāno bhagavaḥ parācīnā mukhā kṛdhi ||10||

sahasrāṇi sahasraśo ye rudrā adhi bhūmyām | teṣāṁ sahasrayojane'vadhanvāni tanmasi | asmin mahatyarṇave'ntarikṣe bhavā adhi | nīlagrīvāḥ śitikaṇṭhāḥ śarvā adhaḥ kṣamācarāḥ | nīlagrīvāḥ śitikaṇṭhā divaṁ rudrā upaśritāḥ | ye vṛkṣeṣu saspiñjarā nīlagrīvā vilohitāḥ | ye bhūtānāmadhipatayo viśikhāsaḥ kapardinaḥ | ye anneṣu vividhyanti pātreṣu pibato janān | ye pathāṁ pathirakṣaya ailabṛdā yavyudhaḥ | ye tīrthāni pracaranti sṛkāvanto niṣaṅginaḥ | ya etāvantaśca bhūyāṁsaśca diśo rudrā vitasthire | teṣāṁ sahasra-yojane'vadhanvāni tanmasi

| namo rudrebhyo ye pṛthivyāṁ ye'ntarikṣe ye divi yeṣāmannaṁ vāto varṣamiṣavastebhyo daśa prācīrdaśa dakṣiṇā daśa pratīcīrdaśodīcīrdaśordhvāstebhyo namaste no mṛḍayantu te yaṁ dviṣmo yaśca no dveṣṭi taṁ vo jambhe dadhāmi ||11||

tryambakaṁ yajāmahe sugandhiṁ puṣṭivardhanam | urvārukamiva bandhanānmṛtyo-rmukṣīya mā'mṛtāt | yo rudro agnau yo apsu ya oṣadhīṣu yo rudro viśvā bhuvanā''viveśa tasmai rudrāya namo astu | tamuṣṭuhi yaḥ sviṣuḥ sudhanvā yo viśvasya kṣayati bheṣajasya | yakṣvāmahe saumanasāya rudraṁ nabhobhirdevamasuraṁ duvasya | ayaṁ me hasto bhagavānayaṁ me bhagavattaraḥ | ayaṁ me viśvabheṣajo'yaṁ śivābhimarśanaḥ | ye te sahasramayutaṁ pāśā mṛtyo martyāya hantave | tān yajñasya māyayā sarvānava yajāmahe | mṛtyave svāhā mṛtyave svāhā | om namo bhagavate rudrāya viṣṇave mṛtyurme pāhi ||

prāṇānāṁ granthirasi rudro mā viśāntakaḥ | tenānnenāpyāyasva || namo rudrāya viṣṇave mṛtyurme pāhi ||

|| oṁ śāntiḥ śāntiḥ śāntiḥ ||

camaka-praśnaḥ - 3 anuvāka

śaṁ ca me mayaśca me priyaṁ ca me'nukāmaśca me kāmaśca me saumanasaśca me bhadraṁ ca me śreyaśca me vasyaśca me yaśaśca me bhagaśca me draviṇaṁ ca me yantā ca me dhartā ca me kṣemaśca me dhṛtiśca me viśvaṁ ca me mahaśca me saṁvicca me jñātraṁ ca me sūśca me prasūśca me sīraṁ c me layaśca ma ṛtaṁ cca me'mṛtaṁ ca me'yakṣmaṁ ca me'nāmayacca me jīvātuśca me dīrghāyutvaṁ ca me'namitraṁ ca me'bhayaṁ ca me sugaṁ ca me śayanaṁ ca me sūṣā ca me sudinaṁ ca me || 3 ||

om śāntiḥ śāntiḥ śāntiḥ ||

durgā sūktam

oṁ || jātavedase sunavāma soma marātīyato nidahāti vedaḥ | sa naḥ par-ṣadati durgāṇi viśvā nāveva sindhuṁ duritātyagniḥ ||

tāmagnivarṇāṁ tapasā jvalantīṁ vairocanīṁ karmaphaleṣu juṣṭām | durgāṁ devīgṁ śaraṇamahaṁ prapadye sutarasi tarase namaḥ ||

agne tvaṁ pārayā navyo asmānth-svastibhirati durgāṇi viśvā | pūśca pṛthvī bahulā na urvī bhavā tokāya tanayāya śaṁyoḥ ||

viśvāni no durgahā jātavedaḥ sindhunna nāvā duritā-tipar-ṣi | agne atrivanmanasā gṛṇāno-smākaṁ bodhyavitā tanūnām ||

pṛtanā jitagṁ sahamānamugramagnigṁ huvema paramāth-sadhasthāt | sa naḥ par-ṣadati durgāṇi viśvā kṣāmaddevo ati duritā-tyagniḥ ||

pratnoṣi kamīḍyo adhvareṣu sanācca hotā navyaśca satsī | svāṇcā-agne tanuvaṁ pipraya-svāsmabhyaṁ ca saubhagamāyajasva || gobhirjuṣṭamayujo niṣiktaṁ tavendra viṣṇoranusaṣcarema | nākasya pṛṣṭhamabhi saṁvasāno vaiṣṇavīṁ loka iha mādayantām ||

oṁ kātyāyanāya vidmahe kanyakumāri dhīmahi | tanno durgiḥ pracodayāt ||

oṁ śāntiḥ śāntiḥ śāntiḥ ||

puruṣa-sūktam

sahasraśirṣā puruṣaḥ । sahasrākṣaḥ sahasrapāt ।
sa bhūmiṁ viśvato vṛtvā । atyatiṣṭhaddaśāṅgulam ।।

puruṣa evedagṁ sarvam । yadbhūtaṁ yacca bhavyam ।
utāmṛtatva syeśānaḥ । yadannenātirohati ।।

etāvānasya mahimā । ato jyāyāg-śca pūruṣaḥ ।
pādosya viśvā bhūtāni । tripādasyāmṛtaṁ divi ।।

tripādūrdhva udaitpuruṣaḥ । pādosyehā bhavātpunaḥ ।
tato viṣvaṇ-vyakrāmat । sāśanānaśane abhi ।।

tasmādvirāḍajāyata । virājo adhi pūruṣaḥ ।
sa jāto atyaricyata । paścād-bhūmimatho puraḥ ।।

yatpuruṣeṇa haviṣā । devā yajñamatanvata ।
vasanto asyāsidājyam । griṣma idhmaśśaradhdhaviḥ ।।

saptāsyāsan-paridhayaḥ । triḥ sapta samidhaḥ kṛtāḥ ।
devā yadyajñaṁ tanvānāḥ । abadhnan-puruṣaṁ paśum ।।

taṁ yajñaṁ barhiṣi praukṣan । puruṣaṁ jātamagrataḥ ।
tena devā ayajanta । sādhyā ṛṣayaśca ye ।।

tasmādyjñāt-sarvahutaḥ । sambhṛtaṁ pṛṣadājyam ।
paśūg-stāg-ścakre vāyavyān । āraṇyān-grāmyāśca ye ।।

tasmādyjñātsarvahutaḥ । ṛcaḥ sāmāni jaṅṣire ।
chandāgṁsi jaṅṣire tasmāt । yajustasmādajāyata ।।

tasmādaśvā ajāyanta । ye ke cobhayādataḥ ।
gāvo ha jaṅṣire tasmāt । tasmājjātā ajāvayaḥ ।।

yatpuruṣaṁ vyadadhuḥ । katithā vyakalpayan ।
mukhaṁ kimasya kau bāhū । kāvūrū pādāvucyete ।।

brāhmaṇo sya mukhamāsit । bāhū rājanyaḥ kṛtaḥ ।
ūrū tadasya yadvaiśyaḥ । padbhyāgṁ śūdro ajāyataḥ ।।

candramā manaso jātaḥ । cakṣoḥ sūryo ajāyata ।
mukhādindraścāgniśca । prāṇādvāyurajāyata ।।

nābhyā āsidantarikṣam । śirṣṇo dyauḥ samavartata ।
padbhyāṁ bhūmirdiśaḥ śrotrāt ।tathā lokāgm akalpayan ।।

vedāhametaṁ puruṣaṁ mahāntam ।
ādityavarṇaṁ tamasastu pāre ।
sarvāṇi rūpāṇi vicitya dhiraḥ ।
nāmāni kṛtvā bhivadan, yadāste ।।

dhātā purastādyamudājahāra । śakraḥ pravidvān-
pradiśaścatasraḥ ।tamevaṁ vidvānamṛta iha bhavati ।
nānyaḥ panthā ayanāya vidyate ।।

yajñaena yajñamayajanta devāḥ । tāni dharmāṇi
prathamānyāsan । te ha nākaṁ mahimānaḥ sacante । yatra
pūrve sādhyāssanti devāḥ ।।

adbhyaḥ sambhūtaḥ pṛthivyai rasācca । viśvakarmaṇaḥ
samavartatādhi ।

tasya tvaṣṭā vidadhadrūpameti | tatpuruṣasya
viśvamājānamagre ||

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ
tamasaḥ parastāt |tamevaṁ vidvānamṛta iha bhavati |
nānyaḥ panthā vidyate yanāya ||

prajāpatiścarati garbhe antaḥ | ajāyamāno bahudhā vijāyate
tasya dhirāḥ parijānanti yonim | maricināṁ padamicchanti
vedhasaḥ ||

yo devebhya ātapati | yo devānāṁ purohitaḥ |
pūrvo yo devebhyo jātaḥ | namo rucāya brāhmaye ||

rucaṁ brāhmaṁ janayantaḥ | devā agre tadabruvan |
yastvaivaṁ brāhmaṇo vidyāt | tasya devā asan vaśe ||

hriśca te lakṣmiśca patnyau | ahorātre pārśve |
nakṣatrāṇi rūpam | aśvinau vyāttam |
iṣṭaṁ maniṣāṇa | amuṁ maniṣāṇa | sarvaṁ maniṣāṇa ||

taccaṁ yorāvṛṇimahe | gātuṁ yanṣāya | gātuṁ
yanṣapataye| daivi svastirastu naḥ | svastirmānuṣebhyaḥ |
ūrdhvaṁ jigātu bheṣajam | śaṁ no astu dvipade | śaṁ
catuṣpade | oṁ śāntiḥ śāntiḥ śāntiḥ ||

tat puruṣāya vidmahe mahādevāya dhīmahi |
tanno rudraḥ prachodayāt

लिङ्गाष्टकम्

ब्रह्म-मुरारि सुरार्चित-लिङ्गं निर्मल-भासित-शोभित-लिङ्गम्।
जन्मज-दुःख-विनाशन लिङ्गं तत् -प्रणमामि सदाशिव- लिङ्गम्॥ १

देव-मुनि-प्रवरार्चित-लिङ्गं काम-दहं करुणाकर- लिङ्गम्।
रावण-दर्प-विनाशन-लिङ्गं तत्-प्रणमामि सदाशिव- लिङ्गम्॥ २

सर्व-सुगन्धि-सुलेपित-लिङ्गं बुद्धि-विवर्धन-कारण-लिङ्गम्।
सिद्ध-सुरासुर-वन्दित- लिङ्गं तत्-प्रणमामि सदाशिव-लिङ्गम्॥ ३

कनक-महामणि-भूषित-लिङ्गं फणिपति-वेष्टित-शोभित-लिङ्गम्।
दक्षसुयज्ञ-विनाशन-लिङ्गं तत्-प्रणमामि सदाशिव-लिङ्गम्॥ ४

कुंकुम-चन्दन-लेपित-लिङ्गं पङ्कज-हार-सुशोभित-लिङ्गम्।
संचित-पाप-विनाशन-लिङ्गं तत्-प्रणमामि सदाशिव-लिङ्गम्॥ ५

देव-गणार्चित सेवित लिङ्गं भावैर्भक्तिभिरेव च लिङ्गम्।
दिनकर-कोटि-प्रभाकर-लिङ्गं तत् -प्रणमामि सदाशिव- लिङ्गम्॥ ६

अष्टलोपरिवेष्टित-लिङ्गं सर्व-समुद्भव कारण लिङ्गम्।
अष्ट-दरिद्र-विनाशन-लिङ्गं तत्-प्रणमामि सदाशिव- लिङ्गम्॥ ७

सुरगुरु-सुरवर-पूजित-लिङ्गं सुरवन-पुष्प-सदार्चित-लिङ्गम्।
परात्परं परमात्मक-लिङ्गं तत्-प्रणमामि सदाशिव- लिङ्गम्॥ ८

लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिव-सन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥

liṅgāṣṭakam

brahmamurāri surārcita liṅgaṁ
nirmalabhāsita śobhita liṅgam |
janmaja duḥkha vināśaka liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 1 ||

devamuni pravarārcita liṅgaṁ
kāmadaham karuṇākara liṅgam |
rāvaṇa darpa vināśana liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 2 ||

sarva sugandha sulepita liṅgaṁ
buddhi vivardhana kāraṇa liṅgam |
siddha surāsura vandita liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 3 ||

kanaka mahāmaṇi bhūṣita liṅgaṁ
phaṇipati veṣṭita śobhita liṅgam |
dakṣasu yajña vināśana liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 4 ||

kuṅkuma candana lepita liṅgaṁ
paṅkaja hāra suśobhita liṅgam |
sancita pāpa vināśana liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 5 ||

devagaṇārcita sevita liṅgaṁ
bhāvairbhaktibhireva ca liṅgam |

dinakara koṭi prabhākara liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 6 ||

aṣṭadaloparivеṣṭita liṅgaṁ
sarvasamudbhava kāraṇa liṅgam |
aṣṭadaridra vināśana liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 7 ||

suraguru suravara pūjita liṅgaṁ
suravana puṣpa sadārcita liṅgam |
parātparaṁ paramātmaka liṅgaṁ
tat-praṇamāmi sadāśiva liṅgam || 8 ||

liṅgāṣṭakamidaṁ puṇyaṁ yaḥ paṭhet-śiva sannidhau |
śivalokamavāpnoti śivena saha modate ||

अथ राजोपचारः

Please refer to bhajans section on page 124

अथ वस्त्रम् (atha vastraṁ)

गजचर्म-धरानन्द गरलाङ्कितकन्धर ।

दुकूलं गृह्यतां देव दुर्गतिं मे निवारय ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । वस्त्रं सर्मपयामि ॥

gajacarma-dharānanda garalāṅkita kandhara|
dukūlam gṛhyatāṁ deva durgatim me nivāraya||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
vastrāṁ samarpayāmi||

अथ उपवीतम् (atha upavītaṁ)

उपवीतं गृहाणेदं पवित्रं परम् शुभम् ।

उमाकान्त-नमस्तुभ्यम् उत्तमं देहिमे फलम् ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।

उपवीतार्थं अक्षतान् सर्मपयामि ॥

upavītam grhānedam pavitṛam paramam śubham|
umākānta namastubhyam uttamam dehi me phalaṁ||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
upavītāṛthaṁ akṣatān samarpayāmi||

अथ भस्मरक्षा (atha bhasma-rakṣā)

अग्निहोत्र-समुद्भूतं विरजाहोम पावितम् ।

गृहाण भस्म हे स्वामिन् भक्तानां भूति दायक ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।

भस्म समर्पयामि ॥

agnihotra-samadbhūtaṁ virajā-homa-pāvitam|
gṛhāṇa bhasma he svāmin bhaktānāṁ bhūtidāyaka||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
bhasmam samarpayāmi||

अथ गन्ध-लेपनम् (atha gandha-lepanam)

गन्धं कुंकुम-संयुक्तं मृगनाभि-समन्वितम् ।

महादेव गृहाणेश महापाप-विनाशन ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।

दिव्यपरिमळ गन्धान् धारयामि ।

गन्धस्योपरि हरिद्रा कुंकुमं समर्पयामि ॥

gandhaṁ kuṁkuma-saṁyuktaṁ mṛganābhi-samanvitam
mahādeva gṛhāṇeśa mahāpāpa-vināśana|
oṁ śrī kāsī viśvanātha svāmine namaḥ||
divya parimaḷa gandhān dhārayāmi|
gandhasyopari haridrākumkumam samarpayāmi||

अथ अक्षताः (atha akṣatāḥ)

अक्षतानक्षत-विभो नक्षत्रेक्ष-विभूषण।

शुद्ध-स्पटिक-सङ्काश स्वामिन् स्वीकुरु शंकर॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः। अक्षतान् समर्पयामि॥

akṣatānakṣata-vibho nakṣatrekṣa vibhūṣaṇa |
śuddha-spaṭika-saṇkāśa svāmin svīkuru śaṁkara ||
oṁ śrī kāsī viśvanātha svāmine namaḥ |
akṣatān samarpayāmi||

अथ पुष्पम् (atha puṣpam)

मल्लिका-कुन्दु-मन्दार-कमलादीनि शंकर।

पुष्पाणि बिल्व-पत्राणि गृहाण करुणा-निधे॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः। पुष्पाणि समर्पयामि॥

mallikā-kundu-mandāra- kamalādīni śaṁkarā|
puṣpāṇi bilva patrāṇi gṛhāṇa karuṇā-nidhe|| oṁ śrī kāsī viśvanātha svāmine namaḥ | puṣpāṇi samarpayāmi|

अथ बिल्वपत्राणि (atha bilva-pātraṇi)

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुतम्।

त्रिजन्म पाप संहारं एक बिल्वं शिवार्पणम्॥ - १

दर्शनमं बिल्वपत्रस्य स्पर्शनम् पापनाशनम्।

अघोरपापसंहारम् एक बिल्वं शिवार्पणम्॥ - ३

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः। बिल्व-पत्रं समर्पयामि॥

tridaḷaṁ triguṇākāraṁ trinetraṁ ca tridhāyudhaṁ|
trijanma pāpasaṁhāram ekabilvaṁ śivārpaṇaṁ ||- 1

darśanaṁ bilvapatrasya sparśanaṁ pāpanāśanaṁ|
aghora pāpasaṁhāram ekabilvaṁ śivārpaṇaṁ ||- 2

oṁ śrī kāsī viśvanātha svāmine namaḥ |
bilva patraṁ-samarpayāmi |

अथ अर्चना (atha arcanā)

शिवाष्टोत्तर शत-नामावळिः śivāṣṭottara ṣata-nāmāvaliḥ

1	ॐ शिवाय नमः	oṁ śivāya namaḥ
2	ॐ महेश्वराय नमः	oṁ maheśvarāya namaḥ
3	ॐ शंभवे नमः	oṁ śaṁbhave namaḥ
4	ॐ पिनाकिने नमः	oṁ pinākine
5	ॐ शशि-शेखराय नमः	oṁ śaśiśekharāya namaḥ
6	ॐ वामदेवाय नमः	oṁ vāmadevāya namaḥ
7	ॐ विरूपाक्षाय नमः	oṁ virūpākṣāya namaḥ
8	ॐ कपर्दिने नमः	oṁ kapardine namaḥ

9	ॐ नील-लोहिताय नमः	oṁ nīlalohitāya namaḥ
10	ॐ शंकराय नमः	oṁ śaṅkarāya namaḥ
11	ॐ शूल-पाणये नमः	oṁ śūlapāṇaye namaḥ
12	ॐ खट्वाङ्गिने नमः	oṁ khaṭvāngine namaḥ
13	ॐ विष्णु-वल्लभाय नमः	oṁ viṣṇu-vallabhāya namaḥ
14	ॐ शिपिविष्ठाय नमः	oṁ śipiviṣṭāya namaḥ
15	ॐ अंभिका-नाथाय नमः	oṁ aṁbikānāthaya namaḥ
16	ॐ श्री-कण्ठाय नमः	oṁ śrīkaṇṭhāya namaḥ
17	ॐ भक्त-वत्सलाय नमः	oṁ bhaktavatsalāya namaḥ
18	ॐ भवाय नमः	oṁ bhavāya namaḥ
19	ॐ शर्वाय नमः	oṁ śarvāya namaḥ
20	ॐ त्रिलोकेशाय नमः	oṁ trilokeśāya namaḥ
21	ॐ शिति-कण्ठाय नमः	oṁ śitikaṇthāya namaḥ
22	ॐ शिवा-प्रियाय नमः	oṁ śivāpriyāya namaḥ
23	ॐ उग्राय नमः	oṁ ugrāya namaḥ
24	ॐ कपालिने नमः	oṁ kapāline namaḥ
25	ॐ कामारये नमः	oṁ kāmāraye namaḥ

26	ॐ अन्धकासुर-सूदनाय नमः	oṁ andhakāsura sūdanāya namaḥ
27	ॐ गङ्गाधराय नमः	oṁ gaṅgādharāya namaḥ
28	ॐ ललाटाक्षाय नमः	oṁ lalāṭākṣāya namaḥ
29	ॐ काल-कालाय नमः	oṁ kālakālāya namaḥ
30	ॐ कृपा-निधये नमः	oṁ kṛpānidhaye namaḥ
31	ॐ भीमाय नमः	oṁ bhīmāya Namaḥ
32	ॐ परशु-हस्ताय नमः	oṁ paraśuhastāya namaḥ
33	ॐ मृग-पाणये नमः	oṁ mṛgapāṇye namaḥ
34	ॐ जटाधराय नमः	oṁ jaṭādharāya namaḥ
35	ॐ कैलास-वासिने नमः	oṁ kailāsavāsine namaḥ
36	ॐ कवचिने नमः	oṁ kavacine namaḥ
37	ॐ कठोराय नमः	oṁ kaṭhorāya namaḥ
38	ॐ त्रिपुरान्तकाय नमः	oṁ tripurāntakāya namaḥ
39	ॐ वृषाङ्गाय नमः	oṁ vṛṣāṅgāya namaḥ
40	ॐ वृषभारूढाय नमः	oṁ vṛṣabhārūḍāya namaḥ
41	ॐ भस्मोद्धूलित-विग्रहाय नमः	oṁ bhasmoddhūlita vigrahāya namaḥ

42	ॐ साम-प्रियाय नमः	oṁ sāma-priyāya namaḥ
43	ॐ स्वरमयाय नमः	oṁ svaramayāya namaḥ
44	ॐ त्रयी-मूर्तये नमः	oṁ trayī-mūrtaye namaḥ
45	ॐ अनीश्वराय नमः	oṁ anīśvarāya namaḥ
46	ॐ सर्वज्ञाय नमः	oṁ sarvajñāya namaḥ
47	ॐ परमात्मने नमः	oṁ paramātmane namaḥ
48	ॐ सोम-सूर्याग्नि-लोचनाय नमः	oṁ somasūryāgni-locanāya namaḥ
49	ॐ हविशे नमः	oṁ haviṣe namaḥ
50	ॐ यज्ञमयाय नमः	oṁ yajñamayāya namaḥ
51	ॐ सोमाय नमः	oṁ śomāya namaḥ
52	ॐ पञ्च-वक्त्राय नमः	oṁ pañcavaktrāya namaḥ
53	ॐ सदाशिवाय नमः	oṁ sadāśivāya namaḥ
54	ॐ विश्वेश्वराय नमः	oṁ viśveśvarāya namaḥ
55	ॐ वीर-भद्राय नमः	oṁ vīra-bhadrāya namaḥ
56	ॐ गणनाथाय नमः	oṁ gaṇanāthāya namaḥ
57	ॐ प्रजा-पतये नमः	oṁ prajāpataye namaḥ

58	ॐ हिरण्यरेतसे नमः	oṁ hiraṇyaretase namaḥ
59	ॐ दुर्दशाय नमः	oṁ durdarṣāya namaḥ
60	ॐ गिरीशाय नमः	oṁ girīśāya namaḥ
61	ॐ गिरिशाय नमः	oṁ giriśāya namaḥ
62	ॐ अनघाय नमः	oṁ anaghāya namaḥ
63	ॐ भुजङ्ग-भूषणाय नमः	oṁ bhujaṅga-bhūṣaṇāya namaḥ
64	ॐ भर्गाय नमः	oṁ bhargāya namaḥ
65	ॐ गिरि-धन्वने नमः	oṁ giri-dhanvane namaḥ
66	ॐ गिरि-प्रियाय नमः	oṁ giri-priyāya namaḥ
67	ॐ कृत्ति-वाससे नमः	oṁ kṛtti-vāsase namaḥ
68	ॐ पुरारातये नमः	oṁ purārātaye namaḥ
69	ॐ भगवते नमः	oṁ bhagavate namaḥ
70	ॐ प्रमथाधिपाय नमः	oṁ pramadhādhipāya namaḥ
71	ॐ मृत्युञ्जयाय नमः	oṁ mṛtyuṁjayāya namaḥ
72	ॐ सुक्ष्म-तनवे नमः	oṁ sūkṣmatanave namaḥ
73	ॐ जगद्व्यापिने नमः	oṁ jagadvyāpine namaḥ
74	ॐ जगद्गुरवे नमः	oṁ jagadgurave namaḥ

75	ॐ व्योम-केशाय नमः	oṁ vyomakeśāya namaḥ
76	ॐ महासेन-जनकाय नमः	oṁ mahāsena-janakāya namaḥ
77	ॐ चारुविक्रमाय नमः	oṁ cāruvikramāya namaḥ
78	ॐ रुद्राय नमः	oṁ rudrāya namaḥ
79	ॐ भूतपतये नमः	oṁ bhūtapataye namaḥ
80	ॐ स्थाणवे नमः	oṁ sthāṇave namaḥ
81	ॐ अहिर्बुध्न्याय नमः	oṁ ahirbudhnyāya namaḥ
82	ॐ दिगम्बराय नमः	oṁ digambarāya namaḥ
83	ॐ अष्ट-मूर्तये नमः	oṁ aṣṭamūrtaye namaḥ
84	ॐ अनेकात्मने नमः	oṁ anekātmane namaḥ
85	ॐ सात्विकाय नमः	oṁ sātvikāya namaḥ
86	ॐ शुद्ध-विग्रहाय नमः	oṁ śuddhavigrahāya namaḥ
87	ॐ शाश्वताय नमः	oṁ śāśvatāya namaḥ
88	ॐ खण्ड-परशवे नमः	oṁ khaṇḍaparaśave namaḥ
89	ॐ अजाय नमः	oṁ ajāya namaḥ
90	ॐ पाश-विमोचकाय नमः	oṁ pāśa-vimocakāya namaḥ
91	ॐ मृडाय नमः	oṁ mṛḍāya namaḥ

92	ॐ पशुपतये नमः	oṁ paśupataye namaḥ
93	ॐ देवाय नमः	oṁ devāya namaḥ
94	ॐ महादेवाय नमः	oṁ mahādevāya namaḥ
95	ॐ अव्ययाय नमः	oṁ avyayāya namaḥ
96	ॐ हरये नमः	oṁ haraye namaḥ
97	ॐ भगनेत्र-भिदे नमः	oṁ bhaganetrabhide namaḥ
98	ॐ अव्यक्ताय नमः	oṁ avyaktāya namaḥ
99	ॐ दक्षाध्वार-हराय नमः	oṁ dakṣadhvaraharāya namaḥ
100	ॐ हराय नमः	oṁ harāya namaḥ
101	ॐ पूषदन्त-भिदे नमः	oṁ pūṣadantabhide namaḥ
102	ॐ अव्यग्राय नमः	oṁ avyagrāya namaḥ
103	ॐ सहस्राक्षाय नमः	oṁ sahasrākṣāya namaḥ
104	ॐ सहस्रपदे नमः	oṁ sahasrapade namaḥ
105	ॐ अपवर्ग-प्रदाय नमः	oṁ apavargapradāya namaḥ
106	ॐ अनन्ताय नमः	oṁ anantāya namaḥ
107	ॐ तारकाय नमः	oṁ tārakāya namaḥ
108	ॐ परमेश्वराय नमः	oṁ parameśvarāya namaḥ

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।

नानविध परिमळ पत्र पुष्पाणि सर्मपयामि ॥

oṁ śrī kāśī viśvanātha svāmine namaḥ|

nānāvidha parimaḷa patra puṣpāṇi samarpayāmi||

अथ धूपम् (atha dhūpam)

धराधर-सुतानाथ धूर्जटे धवल-प्रभ ।

धूपमाघ्रापयामीश दशाङ्ग-गुग्गुलान्वितम् ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । धूपम् आघ्रापयामि ॥

dharādhara sutānātha dūrjaṭe dhavala prabha|

dhūpam-āghrāpayāmīśa daśāṅga-guggulānvitam||

oṁ śrī kāśī viśvanātha svāmine namaḥ|

dhūpam āghrāpayāmi ||

अथ दीपः (atha dīpaḥ)

साज्य-वर्ति-युतं दीपं सर्व-मङ्गल-कारकम् ।

समर्पयामि पश्येदं सोम-सूर्याग्नि-लोचन ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।

ज्ञानप्रकाशाऽर्थं प्रत्यक्षदीपं दर्शयामि ॥

धूप दीपानन्तरम् आचमनीयं समर्पयामि ॥

sājya-varti-yutaṁ dīpaṁ sarva maṅgala kārakam |

samarpayāmi paśyedam soma sūryāgni locana||

oṁ śrī kāśī viśvanātha svāmine namaḥ|

jñāna prakāśārtham pratyakṣa dīpaṁ sandarśayāmi||

dhūpa- dīpānantaram ācamaniyam samarpayāmi||

अथ नैवेद्यम्

ॐ भूर्भुवस्सुवः ।

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

oṁ bhūrbhuvassuvaḥ| tatsaviturvareṇyaṁ bhargo devasya dhīmahi | dhiyo yo naḥ pracodayāt ||

देव सवितः प्रसूव ।

सत्यं त्वर्तेन परिषिञ्चामि । - before 5:00pm

ऋतं त्वा सत्येन परिषिञ्चामि । - after 5:00pm

deva-savitaḥ prasūva|

satyam tvartena pariṣincāmi| - before 5:00pm

ṛtam tvā satyena pariṣincāmi| - after 5:00pm

अमृतोपस्तरणमसि । amrutopastaraṇamasi|

ॐ प्राणाय स्वाहा । oṁ prāṇaya svāhā|

ॐ अपानाय स्वाहा । oṁ apānāya svāhā|

ॐ व्यानाय स्वाहा । oṁ vyānāya svāhā|

ॐ उदानाय स्वाहा । om̐ udānāya svāhā।

ॐ समानाय स्वाहा । om̐ samānāya svāhā।

ॐ ब्रह्मणे स्वाहा । om̐ brahmaṇe svāhā।।

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । यथा शक्ति नैवेद्यं निवेदयामि ।

निवेदन-अनन्तरं आचमनीयं समर्पयामि ॥

मध्ये मध्ये अमृतपानीयं समर्पयामि ॥

अमृतापिधानमसि ॥

उत्तरापोऽशनं जलं समर्पयामि ॥

हस्तप्रक्षालनं जलं समर्पयामि ॥

मुखप्रक्षालनं जलं समर्पयामि ॥

om̐ śrī kāśī viśvanātha svāmine namaḥ।.yathā śakti neivedyam nivedayāmi। nivedana-anantaram ācamanīyam samarpayāmi। madhye madhye amṛtapaṇīyam samarpayāmi। amrutāpidhānamasi।। uttara-pośanam jalam samarpayāmi । hasta-prakṣālam jalam samarpayāmi । mukha-prakṣālam jalam samarpyāmi

अथ ताम्बूलम् (atha tām̐būlam)

पूगीफल-समायुक्तं नागवल्लीदलै-र्युतम् ।

कर्पूर-चूर्ण-सुंयुक्तं ताबूलं प्रतिगृह्यताम् ॥

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः । कर्पूरताबूलं समर्पयामि ॥

pūgī-phala samāyuktam nāgavallī dalairyutam।
karpūra chūrṇa samyuktam tambūlam prati-grhyatām।।
om̐ śrī kāśī viśvanātha svāmine namaḥ।
karpūratambūlam samarpayāmi।।

अथ नीराजनम् (atha nīrājanam)

ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ।

om̐ namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya tripurāntakāya trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ ।

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।

सर्वापराध क्षमापनार्थं सर्वमङ्गल प्राप्तये मंगळ नीराजनं सन्दर्शयामि ॥

नीराजनानन्तरम् आचमनीयं समर्पयामि ॥

oṁ śrī kāśī viśvanātha svāmine namaḥ|

sarvā-aparādha kṣhamāpanārtham , sarva mangaḷa

prāptaye, mangala nīrajanam samarpayāmi||

nīrajanam-anantaram ācamanīyam samarpayāmi||

रक्षां धारयामि ॥ rakśāṁ- dhārayāmi

श्री काशी विश्वनाथ-स्वामि आरति

ॐ हर हर नमः पार्वती-पतये। हर हर महादेव ॥

ॐ देव देवोत्तम देवतासार्व-भौम अखिलाण्ड-कोटि-ब्रह्माण्ड-नायक श्री काशी-विश्वनाथ-स्वामिने नमः। मन्त्र-पुष्पाणि समर्पयामि ॥

ॐ योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति।

चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति।

य एवं वेद योऽपामायतनं वेद। आयतनवान् भवति ॥

हरिः ॐ

स्वस्ति प्रजाभ्यः परिपालयन्ताम्। न्याय्येन मार्गेण महीं महीशाः ॥

गो-ब्राह्मणेभ्यः शुभमस्तु नित्यम्। लोकाः समस्ताः सुखिनो भवन्तु ॥

काले वर्षतु पर्जन्यः। पृथिवी सस्य शालिनी ॥

देशोऽयं क्षोभ रहितः। ब्राह्मणास्सन्तु निर्भयाः ॥

ॐ महद्भ्यो नमः। स्वामिनः।भवन्तस्सर्वे-श्रुण्वन्तु।

स्वस्ति-मन्त्रार्थाः सत्याः सफलास्सन्तु इति महान्तोऽनुगृहनन्तु ॥

तथास्तु।

अस्य देवदवस्य महा-देवस्य अखिलाण्ड-कोटि-ब्रह्माण्ड-नायकस्य देवदेवोत्तमस्य देवता-सार्वभौमस्य सकल-निष्कलस्वरुपस्य षड्त्रिंषद् -तत्त्वातीतस्य सर्वज्ञत्व सर्वेश्वरत्व सर्वान्तर्यामित्व सर्व-सृष्ट्रत्व सर्व-भोक्तृत्व सर्व-संहारकत्व सर्व-व्यापकत्व

सर्व-शक्तिमत्वादि-गुण-गण-विभूषितस्य वेदान्त-वेद्यस्य पार्वती-सनाथस्य ऋषभ -वाहनारुढस्य कैलास-शिखर-निवासस्य नन्दी भृङ्गी चण्ड कुण्डोदर पतञ्जली व्याघ्र-पाद-विनायक-षण्मुखाद्यैः सकल-प्रमथ-गण सेवित-सेव्यमानस्य लोकानुग्रह-कारकस्य भक्तानुग्रह-वरदस्य भगवतः श्री काशी-विश्वनाथ-स्वामिनः नित्य-पूजा अभिषेक अलंकार नैवेद्य दीपाराधन कर्मणि-मध्ये यत्किञ्चित् मन्त्रलोपे तन्त्रलोपे क्रियालोपे शक्तिलोपे श्रद्धालोपे काललोपे नियमलोपे नैवेद्यादि-विहितलोपे च सत्यं सर्व यथा प्रोक्तं यथा शास्त्रानुष्ठितं भगवत्-प्रीतिकरं भूयादिति महान्तोऽनुगृह्णन्तु। तथास्तु॥

सर्वे जनाः सुखिनो भवन्तु। तथास्तु॥
सर्वं समस्तं सन्मङ्गलानि सन्तु। तथास्तु॥
अयं धर्मः उत्तरोत्तराभिवृद्धिरस्तु। तथास्तु॥
राजा धार्मिकी विजयी भवतु। तथास्तु॥
देशोऽयं निरुपद्रवोऽस्तु। तथास्तु॥
सत्या एता आशिषः सन्तु तथास्तु॥

ॐ निधन-पतये नमः। निधन-पतान्तिकाय नमः।
ॐ ऊर्ध्वाय नमः। ऊर्ध्व-लिङ्गाय नमः।
ॐ हिरण्याय नमः। हिरण्य-लिङ्गाय नमः।
ॐ सुवर्णाय नमः। सुवर्ण-लिङ्गाय नमः।

ॐ दिव्याय नमः। दिव्य-लिङ्गाय नमः।
ॐ भवाय नमः। भव-लिङ्गाय नमः।
ॐ शर्वाय नमः। शर्व-लिङ्गाय नमः।
ॐ शिवाय नमः। शिव-लिङ्गाय नमः।
ॐ ज्वलाय नमः। ज्वल-लिङ्गाय नमः।
ॐ आत्माय नमः। आत्म-लिङ्गाय नमः।
ॐ परमाय नमः। परम-लिङ्गाय नमः।

ॐ एतत्सोमस्य सूर्यस्य सर्वलिङ्ग्ग स्थापयति पाणिमन्त्रं पवित्रम्॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः।
भवे भवेनाति भवे भवस्व मां। भवोद्भवाय नमः।

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥

तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्॥

ईशानस्सर्व विद्याना-मीश्वरस्सर्व भूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

ॐ नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः ॥

ॐ हर हर नमः पार्वती-पतये । हर हर महादेव ॥

At Lord Shiva Altar

ॐ राजाधिराजाय प्रसह्यसाहिने ।नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ॥

At Sri Ram Parivār Altar

ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात् ॥

ॐ जनकात्मजायै विद्महे रामपत्नी च धीमहि । तन्नः सीता प्रचोदयात् ॥

ॐ तत्पुरुषाय विद्महे आदिशेषाय धीमहि । तन्नो लक्ष्मणः प्रचोदयात् ॥

ॐ आञ्जनेयाय विद्महे रामदूताय धीमहि । तन्नो हनुमत् प्रचोदयात् ॥

At Lord Anjaneya Altar

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमूख्यं श्रीरामदूतं शिरसा नमामि ॥

At Guru Dev Altar

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानशुः । परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति ।
वेदान्तविज्ञान-सुनिश्चितार्था-स्संन्यास योगाद्यतयश्शुद्धसत्त्वाः । ते ब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे । दहं विपापं

परमेऽश्मभूतं यत्पुण्डरीकं पुरमध्यसग्गस्थम् । तत्रापि दहं गगनं विशोक-स्तस्मिन् यदन्तस्तदुपासितव्यम् ।
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृति-लीनस्य यः परस्स महेश्वरः ॥

At Lord Shiva Altar

न तत्र सूर्यो भाति न चन्द्र-तारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभावि ॥

ॐ हर हर नमः पार्वती-पतये । हर हर महादेव ॥

śrī kāśī viśvanātha swāmi ārti

oṁ hara hara namaḥ pārvatī-pataye| hara hara mahādeva||

oṁ deva devottama devatāsārva-bhauma akhilānda-koti-brahmānda-nāyaka śrī kāśī viśvanātha svāmine namaḥ| mantra-puṣpāṇi samarpayāmi.

oṁ yopāṁ puṣpaṁ veda puṣpavān prajāvān paśumān bhavati | candramā vā apāṁ puṣpam | puṣpavān prajāvān paśumān bhavati | ya evaṁ veda | yopāmāyatanaṁ veda | āyatanavān bhavati | harih oṁ||

svasti prajābhyah paripālayantām | nyāyyena mārgeṇa mahīm mahīṣāh ||

go-brāhmaṇebhyah subhamastu nityam |lokāh samastāh sukhino bhavantu||

kāle varṣatu parjanyaḥ| pṛthivī sasya śālinī|| deśo'yaṁ kṣobha rahitaḥ | brāhmaṇāssantu nirbhayāḥ||

oṁ mahadbhyo namaḥ | svāminaḥ | bhavantassarve-śruṇvantu| svasti-mantrārthāḥ satyāḥ saphalāssantu iti mahānto'nugṛhṇantu | tathāstu|

asya deva devasya mahā-devasya akhilāṇḍa koṭi brahmāṇḍa-nāyakasya devadevottamasya devatā-sārvabhaumasya sakala-niṣkala-svarūpasya ṣaḍtriṁṣaṭ-taṭvātītasya sarvjñatva sarveśvaratva sarvāntaryāmitva

sarva-sṛṣṭṛtva sarva-bhoktṛtva sarva-saṁhārakatva sarva-vyāpakatva sarva-śaktimatvādi-guṇa-gaṇa-vibhūṣitasya kailāsa-śikhara-nivāsasya nandi bhṛṇgī caṇḍa kuṇḍodara pataṇjalī vyāghra-pāda-vināyaka-ṣaṇmukhādyaiḥ sakala-pramatha-gaṇa sevita-sevyamānasya lokānugraha-kārakasya bhaktānugraha-varadasya bhagavataḥ śrī kāśī-viśvanātha-svāminaḥ nitya-pūjā abhiṣeka alaṁkāra naivedya dīpārādhana karmaṇi-madhye yatkiṇcit matralope tantralope kriyālope śaktilope śraddhālope kālalope niyamalope naivedyādi-vihitalope ca satyaṁ sarvaṁ yathā proktaṁ yathā śāstrānuṣṭhitaṁ bhagavat-prītikaraṁ bhūyāditi mahānto 'nugṛhṇantu| tathāstu|

sarve jaṇāh sukhino bhavantu| tathāstu||
sarvaṁ samastaṁ sanmaṇgalāni santu| tathāstu||
ayaṁ dharmaḥ uttarottarābhivṛḍḍhirastu| tathāstu||
rājā dhārmīkī vijayī bhavatu| tathāstu||
deśo'yaṁ nirupadravo'stu| tathāstu||
satyā etā āśiṣaḥ santu| tathāstu||

oṁ nidhana pataye namaḥ| nidhana-patāntikaya namaḥ|
oṁ ūrdhvāya namaḥ| ūrdhva-lingāya namaḥ|
oṁ hiraṇyāya namaḥ| hiraṇya-lingāya namaḥ|
oṁ suvarṇāya namaḥ| suvarṇa-lingāya namaḥ|
oṁ divyāya namaḥ| divya-lingāya namaḥ|

oṁ bhavāya namaḥ।	bhava-lingāya namaḥ।
oṁ śarvāya namaḥ।	śarva-lingāya namaḥ।
oṁ śivāya namaḥ।	śiva-lingāya namaḥ।
oṁ jvalāya namaḥ।	jvala-lingāya namaḥ।
oṁ ātmāya namaḥ।	ātma-lingāya namaḥ।
oṁ paramāya namaḥ।	parama-lingāya namaḥ।

oṁ etat somasya sūryasya sarvaliṅgagasthāpayati pāṇimantraṁ pavitram।

sadyo jātam prapadyāmi sadyojātāyavai namo namaḥ। bhave bave nāti bhave bhavasvamām bhavodbhavāya namaḥ।।

vāmadevaya namo jyeṣṭhāya namah ṣresṭāya namo rudrāya namah kālāya namaḥ kalavikaraṇāya namo balavikaraṇāya namo balāya namo balapramathanāya namah sarva bhūta damanāya namo manonmanāya namah।।

aghorebhyo' thagorebhyo ghora ghora tarebhyah sarvebhyaḥ sarva-śarvebhyo namaste astu rudra rūpebhyaḥ।।

tat puruṣāya vidmahe mahādevāya dhīmahi । tanno rudraḥ prachodayāt।।

īśānassarva vidyānām īśvara ssarva bhūtānām brahmādhipatir- brahmaṇodhipatir brahmā śivo me astu sadā śivoṁ।।

oṁ namo hiraṇya bāhave hiraṇya varṇāya hiraṇya rūpāya hiraṇya pataye'mbikā-pataya umāpataye paśupataye namo namaḥ।।

oṁ hara hara namaḥ pārvatī pataye । hara hara mahadev।।

At Lord Śiva Altar

oṁ rājādhirājāya prasahya sāhine । namo vayaṁ vaiśravaṇāya kurmahe । sa me kāmān kāma kāmāya mahyam । kāmeśvaro vaiśravaṇo dadātu । kuberāya vaiśravaṇāya । mahārājāya namaḥ ।

At Lord Rām Parivār Altar

oṁ dāśarathāya vidmahe sītā vallabhāya dhīmahi । tanno rāma pracodayāt ।।
oṁ janakātmajāyai vidmahe rāma patnyai ca dhīmahi । tannah sītā pracodayāt ।।
oṁ tat-puruṣāya vidmahe ādi-śeṣāya dhīmahi । tanno lakṣhmaṇaḥ pracodayāt ।।
oṁ āñjaneyāya vidmahe rāma dūtāya dhīmahi । tanno hanumat pracodayāt ।।

At Lord Hanuman's Altar

manojavaṁ mārutatulyavegaṁ jitendriyaṁ buddhimatāṁ variṣṭam|
vātātmajam vānarayūthamukhyaṁ śrirāmadūtaṁ śirasā namāmi||

At Guru Dev Altar

na karmaṇā na prajayādhane na tyāgenaike amṛtatva-mānaśuḥ | pareṇa nākaṁ nihitaṁ guhāyāṁ vibhrājadetat-yatayo viśanti | vedānta-vijñāna-suniścitārthāssanṁnyāsa-yogāt-yatayaśśuddha-saṭvaḥ | te brahmaloke tu parāntakale parāmṛtāt parimucyanti sarve | dahraṁ vipāpaṁ parameśma-bhūtaṁ yat-puṅdarīkaṁ puramadhya-sagstaṁ | tatrāpi dahraṁ gaganaṁ viśoka-stasmin yadantas-tadupāsitavyam||

yo vdādau svaraḥ prokto vedānte ca pratishṭitaḥ | tasya prakṛti-līnasya yaḥ parassa maheshvaraḥ||

At Lord Śiva Altar

na tatra sūryo bhāti na candra-tārakaṁ nemā vidyuto bhānti kuto'yamagniḥ| tameva bhāntam-anubhāti sarvaṁ tasya bhāsā sarvamidaṁ vibhāti

oṁ hara hara namaḥ pārvatī-pataye hara hara mahādeva|

शिवस्तुतिः

कृपा-समुद्रंः सुमुखं त्रिनेत्रं जटाधरं पार्वती वामभागम्।
सदाशिवं रुद्रं अनन्तरूपं शिव-चिदम्बरेशं हृदि-भावयामि।
वन्दे शंभो-उमापतिं सुरगुरुं वन्दे जगत्कारणम्। वन्दे पन्नग-भूषणं मृगधरं वन्दे पशूनां पतिम्। वन्दे सूर्य-शशाङ्क-वह्नि-नयनं वन्दे मुकुन्द-प्रियम्। वन्दे भक्तजन-आश्रयञ्च-वरदं वन्दे शिवं शंकरम्॥
शंकरस्य चरिता-कथा-रसं चन्द्र-शेखर-गुणानुकीर्तनम्। नीलकण्ठ तव पाद-सेवनं संभवन्तु मम जन्म-जन्मनि॥

शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम्। शिव-मार्ग-प्रणेतारं प्रणतोऽस्मि सदाशिवम्।
महादेवं महेशानं महेश्वर उमापतिम्।महाशयनगुरुं वन्दे महाभय-निवारणं मनःक्लेश-निवारणं मम शत्रु-निवारणं॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम। तस्मात् कारुण्य-भावेन रक्ष रक्ष महेश्वर॥
कर-चरण-कृतं वाक-कायजं कर्मजं वा। श्रवण-नयनजं वा मानसं वापराधम्।विहितमविहितं वा सर्वमेतत्-क्षमस्व।
शिव शिव करुणाब्धे श्रीमहादेव शंभो॥
ॐ श्री काशी-विश्वनाथ-स्वामिने नमः।
प्रार्थन नमस्कारान् समर्पयामि॥

śiva-stutiḥ

kṛpā samudraṁ sumukham trinetram jaṭadharaṁ pārvatī vāmabhāgam | sādaśivaṁ rudraṁ anantarūpaṁ śiva chidambareśaṁ hṛdi bhāvayāmi

vande śaṁbho-umāpatiṁ suraguruṁ vande jagat-kāraṇam| vande paṇagabhūśaṇaṁ mṛgadharaṁ vande paśūnāṁ patim| vande sūrya-śaśāṇka-vahni-nayanaṁ vande mukunda-priyam |vande bhaktajana-āśrayañca-varadaṁ vande śivaṁ śaṁkaram||

śaṁkarasya caritā-kathārasaṁ chandraśekhara-guṇāṇukīrtanam | nīlakaṇtha tava pāda sevanaṁ saṁbhavantu mama janma janmani||

śivam śivakaraṁ śāntaṁ śivātmāṇaṁ śivaottamam| śiva-mārga-praṇetāraṁ praṇato'smi sadāśivaṁ| mahādevaṁ maheśānaṁ maheśvara umāpatim| mahāśayana-guruṁ vande mahābhaya-nivāraṇaṁ manaḥ-kleśa-nivāraṇaṁ mama śatru-nivāraṇaṁ

anyathā śaraṇaṁ nāsti tvameva śaraṇaṁ mama| tasmāt kāruṇya bhāvena raksha raksha maheśvara||

karacaraṇakṛtaṁ vākkāyajaṁ karmajaṁ vā śravaṇanayanajaṁ vā mānasaṁ vāparādham | vihitamavihitaṁ vā sarvametatkṣmasva śiva śiva karuṇābdhe śrī mahādeva śambho ||

oṁ śrī kāsī viśvanātha svāmine namaḥ
prārthanā namaskārān samarpayāmi.

अथ प्रदक्षिण नमस्कारः (atha pradakṣiṇa namaskāraḥ)

यानि-कानि च पापानि जन्मान्तर-कृतानि च ।
तानि-तानि विनश्यन्तु प्रदक्षिण पदे पदे ॥
प्रकृष्ट पापनाशाय प्रकृष्टफलदायिने ।
प्रदिक्षणं करोमीशं प्रसीद परमेश्वर ॥
ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।
प्रार्थन नमस्कारान् । प्रदक्षिण नमस्कारान् समर्पयामि ॥

yāni kāni ca pāpāni janmāntara kṛtāni ca
tāni tāni vinaśyantu pradakṣiṇa pade pade
prakṛṣta pāpanāsāya prakṛṣṭa-phaladāyine
pradakṣinam karomīśam prasīda parameṣvara||
oṁ śrī kāsī viśvanātha svāmine namaḥ
pradakṣina namaskārān samarpayāmi||

अथ समार्पणम् (atha samārpaṇam)

ॐ श्री काशी-विश्वनाथ-स्वामिने नमः ।
सर्वोपचार समस्त राजोपचार देवोपचार पूजान् समर्पयामि ॥

oṁ śrī kāsī viśvanātha svāmine namaḥ |
sarvopacāra samasta rājopacāra devopacāra pūjān
samarpayāmi||

अथ तीर्थ प्राशनम् (atha tīrtha prāśanam)

अकालमृत्यूहरणं समस्त पाप क्षयकरं सर्व व्याधि निवारणं

श्री काशी-विश्वनाथ-स्वामि पादोदकं पावनं शुभम् ॥

akāla mṛtyu haraṇam samasta pāpa kśayakaram sarva
vyādhi nivāraṇam | śrī kāsī viśvanātha swāmi pādodakam
pāvanam śubham||

अथ शङ्ख मन्त्रम् (atha śankha mantram)

शङ्खमध्ये स्थितं तोयं - भ्रामितं शङ्करोपरि ।

अङ्ग लग्नं मनुष्याणां - ब्रह्महत्यायुतं दहेत् ॥

śankha-madhye sthitam thoyam - bhramitam śankaropari|
anga-lagnam manuṣyāṇām brahma-hṛtyāyutam dahet||

क्षमा प्रार्थना

विसर्ग बिन्दुमात्राणि पदपादाक्षराणि च । न्यूनानि चातिरिक्तानि क्षमस्व परमेश्वर ॥ अपराध सहस्त्राणि क्रियन्तेऽहर्निशं मया ।तानि सर्वाणि देवेश क्षमस्व पुरुषोत्तम ॥

मध्ये मन्त्रतन्त्र स्वरवर्ण ध्याननियम न्यूनातिरिक्त लोपदोष प्रायश्चित्तार्थं

अच्युतानन्तगोविन्द नामत्रय महामन्त्रजपं करिष्ये ॥

अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः । ३

अच्युतानन्तगोविन्द देवताभ्यो नमः

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेस्स्वभावात् ।

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ।

सदाशिवायेति समर्पयामि ॥

ॐ तत्सत् । ब्रह्मार्पणमस्तु ।

ॐ श्री काशी-विश्वनाथ-स्वामि प्रीयताम् ॥

क्षोभनार्थे क्षेमाय पुनः आगमनाय च ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ हरिः ॐ श्री गुरुभ्यो नमः । हरिः ॐ ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।

सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःख भाग्भवेत् ॥

kṣhamā prārthanā

visarga bindu-mātrāṇi padapādā-kṣarāṇi ca | nyunāni cātiriktāni kṣamasva parameśvara|| aparādha sahasrāṇi kriyante-aharniśam mayā| tāni sarvāṇi deveśa kṣamasva puroṣottama| madhye-mantra-tantra svara-varṇa dhyana-niyama nyunātirikta lopa doṣa prāyaścittārtham acuta-ananta-govinda nāma traya mahāmantra japam kariṣye||

oṁ acyutāya namaḥ |
oṁ anantāya namaḥ |
oṁ govindāya namaḥ| - 3 times
oṁ acyuta- ananta- govinda devatābhyo namaḥ|

kāyena vācā manasendriyairvā buddhyātmanā vā prakṛte ssvabhāvāt |karomi yadyat-sakalaṁ parasmai
śrīmannārāyaṇāyeti samarpayāmi ||
sadāśivāyeti samarpayāmi ||

hariḥ oṁ tatsat | brahmārpaṇamastu |
śrī kāsī viśvanātha swāmi preeyatām.
kṣobhanārthe kṣhemāya punah āgamanāya cā||

oṁ pūrnamadaḥ pūrnamidaṁ pūrnātpūrnamudacyate |
pūrnasya pūrnamādāya pūrnamevāvaśiṣyate ||

oṁ śāntiḥ śāntiḥ śāntiḥ ||

hariḥ oṁ śrī guru-bhyo namaḥ. hariḥ oṁ||

sarve bhavantu sukhinaḥ sarve santu nirāmayāḥ |
sarve bhadrāṇi paśyantu mā kaścidduḥkha bhāgbhavet ||

श्री शिव पञ्चाक्षर स्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय - भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय - तस्मै नकाराय नमः शिवाय ॥१॥

मन्दाकिनी सलिल चन्दन चर्चिताय - नन्दीश्वर प्रमथानाथ महेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय - तस्मै मकाराय नमः शिवाय ॥२॥

शिवाय गौरीवदनाब्जवृन्द - सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय - तस्मै शिकाराय नमः शिवाय ॥३॥

वसिष्ठकुम्भोद्धवगौतमार्य - मुनीन्द्रदेवार्चितशेखराय
चन्द्रार्कवैश्वानरलोचनाय - तस्मै वकाराय नमः शिवाय ॥४॥

यज्ञस्वरूपाय जटाधराय - पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय - तस्मै यकाराय नमः शिवाय ॥५॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसंन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥६॥

śiva pancākṣar stotram

nāgendrahārāya trilocanāya
bhasmāṅgarāgāya maheśvarāya |
nityāya śuddhāya digambarāya
tasmai **na** kārāya namaḥ śivāya || 1 ||

mandākinī salila candana carcitāya
nandīśvara pramathanātha maheśvarāya |
mandāra puṣpa bahupuṣpa supūjitāya
tasmai **ma** kārāya namaḥ śivāya || 2 ||

śivāya gaurī vadanābjvṛnda
sūryāya dakṣādhvara nāśakāya |
śrī nīlakaṇṭhāya vṛṣadhadhvajāya
tasmai **śi** kārāya namaḥ śivāya || 3 ||

vaśiṣṭha kumbhodbhava gautamārya
munīndra devārcita śekharāya |
candrārka vaiśvānara locanāya
tasmai **va** kārāya namaḥ śivāya || 4 ||

yajñ svarūpāya jaṭādharāya
pināka hastāya sanātanāya |
divyāya devāya digambarāya
tasmai **ya** kārāya namaḥ śivāya || 5 ||

paṣcākṣaramidaṁ puṇyaṁ yaḥ paṭhecchiva sannidhau |
śivalokamavāpnoti śivena saha modate ||

शिवमानसपूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पूष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१ ॥

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२ ॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकलागीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुविर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३ ॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४ ॥

करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् ।
विदितमविदितं वा सर्वमेतत्क्षमस्व जयजय करुणाब्धे श्रीमहादेव शम्भो ॥५ ॥

śiva mānasa pūja

ratnaiḥ kalpitamāsanaṁ himajalaiḥ snānaṁ ca divyāmbaraṁ |
nānāratna vibhūṣitaṁ mṛgamadā modāṅkitaṁ candanam|
jātī campaka bilvapatra racitaṁ puṣpaṁ ca dhūpaṁ tathā|
dīpaṁ deva dayānidhe paśupate hṛtkalpitaṁ gṛhyatām || 1 ||

sauvarṇe navaratnakhaṇḍa racite pātre ghṛtaṁ pāyasaṁ |
bhakṣyaṁ pancavidhaṁ payodadhiyutaṁ rambhāphalaṁ
pānakam |
śākānāmayutaṁ jalaṁ rucikaraṁ karpūra khaṇḍojjcalaṁ |
tāmbūlaṁ manasā mayā viracitaṁ bhaktyā prabho svīkuru || 2 ||

catraṁ cāmarayoryugaṁ vyajanakaṁ cādarśakaṁ nirmalaṁ |
vīṇā bheri mṛdaṅga kāhalakalā gītaṁ ca nṛtyaṁ tathā |
sāṣṭāṅgaṁ praṇatiḥ stuti-rbahuvidhā-hyetat-samastaṁ mayā |
saṅkalpena samarpitaṁ tava vibho pūjāṁ gṛhāṇa prabho || 3 ||

ātmā tvaṁ girijā matiḥ sahacarāḥ prāṇāḥ śarīraṁ gṛhaṁ|
pūjā te viṣayopabhoga-racanā nidrā samādhisthitiḥ |
sancāraḥ padayoḥ pradakṣiṇavidhiḥ stotrāṇi sarvā giro|
yadyatkarma karomi tattadakhilaṁ śambho tavārādhanam || 4 ||

kara caraṇa kṛtaṁ vākkāyajaṁ karmajaṁ vā |
śravaṇa nayanajaṁ vā mānasaṁ vāparādham |
vihitamavihitaṁ vā sarvametat-kṣamasva|
jaya jaya karuṇābdhe śrī mahādeva śambho || 5 ||

निर्वाण षट्कम्

मनोबुद्ध्यहङ्कारचित्तानि नाहं न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमि न तेजो न वायु-श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न च प्राणसंज्ञो न वै पञ्चवायु र्न वा सप्तधातुर्न ना पञ्चकोषाः ।
न वाक्पाणिपादं न चोपस्थपायू-श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्ष-श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न पुण्यं न पापं न सौख्यं न दुःखं न मन्त्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्त - श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न मृत्युर्न शङ्का न मे जातिभेदः पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य - श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

अहं निर्विकल्पो निराकाररूपो विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासङ्गतं नैव मुक्तिर्न मेय - श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

nirvāṇa ṣaṭkam

mano budhyahaṅkāra cittāni nāhaṁ
na ca śrotra jihve na ca ghrāṇanetre |
na ca vyoma bhūmir-na tejo na vāyuḥ
cidānanda rūpaḥ śivohaṁ śivoham || 1 ||

na ca prāṇa sajño na vaipanca vāyuḥ
na vā saptadhātur-na vā panca kośāḥ |
navākpāṇi pādau na copastha pāyū
cidānanda rūpaḥ śivohaṁ śivoham || 2 ||

na me dveṣarāgau na me lobhamohau
mado naiva me naiva mātsaryabhāvaḥ |
na dharmo na cārtho na kāmo na mokṣaḥ
cidānanda rūpaḥ śivohaṁ śivoham || 3 ||

na puṇyaṁ na pāpaṁ na saukhyaṁ na duḥkhaṁ
na mantro na tīrthaṁ na vedā na yajñaḥ |
ahaṁ bhojanaṁ naiva bhojyaṁ na bhoktā
cidānanda rūpaḥ śivohaṁ śivoham || 4 ||

na mṛtyur-na śaṅkā na me jāti bhedaḥ
pitā naiva me naiva mātā na janma |
na bandhur-na mitraṁ gururnaiva śiṣyaḥ
cidānanda rūpaḥ śivohaṁ śivoham || 5 ||

ahaṁ nirvikalpo nirākāra rūpo
vibhūtvācca sarvatra sarvendriyāṇām |
na cā sangathaṁ naiva muktir na meyaḥ |
cidāṅanda rūpaḥ śivohaṁ śivoham || 6 ||

śivohaṁ śivohaṁ, śivohaṁ śivohaṁ, śivohaṁ śivohaṁ

शिवाष्टकम्

प्रभुंः प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानन्दभाजम् ।
भवद्भव्यभूतेश्वरं भूतनाथं शिवं शङ्करं शम्भुमीशानमीडे ॥१ ॥

गले रूण्डमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम् ।
जटाजूटगङ्गोत्तरङ्गैर्विशालं शिवं शङ्करं शम्भुमीशानमीडे ॥२ ॥

मुदामाकरं मण्डलं मण्डयन्तं महामण्डलं भस्मभूषाधरन्तम् ।
अनादिह्यपारं महामोहहारं शिवं शङ्करं शम्भुमीशानमीडे ॥३ ॥

वटादौनिनासं महाट्टाट्टहासं महापापनाशं सदासुप्रकाशम् ।
गिरीशं गणेशं सुरेशं महेशं शिवं शङ्करं शम्भुमीशानमीडे ॥४ ॥

गिरिन्द्रात्मजासंग्रहीतार्धदेहं गिरौ संस्थिनं सर्वदा सन्निगेहम् ।
परब्रह्मब्रह्मादिभिर्वन्द्यमानं शिवं शङ्करं शम्भुमीशानमीडे ॥५ ॥

कपालं त्रिशूलं कराभ्यां दधानं पदाम्भोजनम्राय कामं ददानम् ।
बलीवर्दयानं सुराणां प्रधानं शिवं शङ्करं शम्भुमीशानमीडे ॥६ ॥

शरच्चन्द्रगात्रं गणानन्दपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।
अपर्णाकलत्र सदा सच्चरित्रं शिवं शङ्करं शम्भुमीशानमीडे ॥७ ॥

हरं सर्पहारं चिताभूविहारं भवं वेदसारं सदा निर्विकारम् ।
श्मशाने वसन्तं मनोजं दहन्तं शिवं शङ्करं शम्भुमीशानमीडे ॥७ ॥

स्तवं यः प्रभाते नरः शूलपाणे पठेत् सर्वदा भर्गभावानुरक्तः ।
सुपुत्रं धनं धान्यमित्रं कलत्रं विचित्रं समाराद्य मोक्षं प्रयाति ॥

śivāṣṭakam

prabhuṁ prāṇanāthaṁ vibhuṁ viśvanāthaṁ jagannātha
nāthaṁ sadānanda bhājām |
bhavadbhavya bhūteśvaraṁ bhūtanāthaṁ, śivaṁ
śaṅkaraṁ śambhumīśānamīḍe || 1 ||

gaḷe ruṇḍamālaṁ tanau sarpajālaṁ mahākāla kālaṁ
gaṇeśādi pālam |
jaṭājūṭa gaṅgottaraṅgai rviśālaṁ, śivaṁ śaṅkaraṁ śambhu
mīśānamīḍe || 2||

mudāmākaraṁ maṇḍanaṁ maṇḍayantaṁ mahā maṇḍalaṁ
bhasma bhūṣādharan tam |
anādiṁ hyapāraṁ mahā mohahāraṁ, śivaṁ śaṅkaraṁ
śambhu mīśānamīḍe || 3 ||

vaṭādhau nivāsaṁ mahāṭṭāṭṭahāsaṁ mahāpāpa nāśaṁ sadā
suprakāśam |
girīśaṁ gaṇeśaṁ sureśaṁ maheśaṁ, śivaṁ śaṅkaraṁ
śambhumīśānamīḍe || 4 ||

girīndrātmajā saṅgrhītārdhadehaṁ girau saṁsthitaṁ
sarvadāpanna geham |
parabrahma brahmādibhir-vandyamānaṁ, śivaṁ
śaṅkaraṁ śambhumīśānamīḍe || 5 ||

kapālaṁ triśūlaṁ karābhyāṁ dadhānaṁ
padāmbhojanamrāya kāmaṁ dadānam |

balīvardhamānaṁ surāṇāṁ pradhānaṁ, śivaṁ śaṅkaraṁ
śambhu mīśānamīḍe || 6 ||

śaraccandra gātraṁ gaṇānandapātraṁ trinetraṁ pavitraṁ
dhaneśasya mitram |
aparṇā kaḷatraṁ sadā saccaritraṁ, śivaṁ śaṅkaraṁ śambhu
mīśānamīḍe || 7 ||

haraṁ sarpahāraṁ citā bhūvihāraṁ bhavaṁ vedasāraṁ
sadā nirvikāraṁ|
śmaśāne vasantaṁ manojaṁ dahantaṁ, śivaṁ śaṅkaraṁ
śambhu mīśānamīḍe || 8 ||

stavaṁ yaḥ prabhāte naraśśūla pāṇe paṭhet sarvadā
bhargabhāvānu-raktah |
suputraṁ dhanam dhānyamitraṁ kaḷatraṁ vicitram
samārādhya mokṣaṁ prayāti ||

विश्वनाथाष्टकम्

गङ्गातरङ्ग रमणीय जटा कलापम्। गौरी निरन्तर विभूषित वामभागम्।
नारायणः प्रिय मनङ्ग मदापहारम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ १

वाचामगोचर मनेक गुणस्वरूपम्।वागीश विष्णु सुरसेवित पादपीठम्
वामेण विग्रहवरेण कळत्रवन्तम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ २

भूतादिपम् भुजग भूषण भूशिताङ्गम्।व्याघ्राजिनाम् भरदरम् जटिलम् त्रिनेत्रम्।
पाषाङ्कुशाभय वरप्रद शूलपाणिम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ ३

सीतांशुशोभित किरीटम विराज मानम्।पालेक्षणानल विशोसित पञ्च भाणम्।
नागादिपारचित भासुर कर्ण पूरम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ ४

पञ्चाननम् दुरित मत्त मतङ्ग जानाम्।नागान्तकम् दनुज पुङ्गव पन्नगानाम्।
दावानलम् मरण शोक जराट वीणाम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ ५

तेजोमयम् सगुण निर्गण मद्वितीयम्।आनन्द कन्दमपिराजित मप्रमेयम्।
नागात्मकम् सकल निश्कलमात्मरूपम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ ६

आशाम् विहाय परिहृत्य परस्य निन्दा।पापेरथिञ्च सुनिवार्य मनःसमाधौ।
आदाय हृत्कमल मद्यगतम् प्रदेशम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ ७

रागादि दोश रहितम् स्वजनानुरागम्। वैराध्य शान्ति निलम् गिरिजा सहायम्।
मादुर्य दैर्य सुभगम् गरळाभिरामम्। वाराणसी पुरपतिम् भज विश्वनाथम्॥ ८

वाराणसी पुरपतेः स्थवनम् शिवस्य। व्यासोक्तमस्तकमिदम् पठितेमनुश्य।
विद्याम् श्रियम् विपुल सौक्यमनन्त कीर्तम्। संप्राप्य देह निलये लभते च मोक्षम्॥
विश्वनाथाष्टकमिदम् यपटेत् शिव सन्निधौ। शिवलोकमवाप्नोति शिवेन सह मोदते॥

viśvanathaṣṭakam

gangā taranga ramanīya jaṭā kalāpam। gaurī nirantara vibhūṣita vāmabhāgam। nārāyanaḥ priyamananga madāpahāram। vārānasī purapatim bhaja viśvanātham।।1।।

vācāma gocaram aneka guna swarūpam। vāgīśa viṣnu surasevita pāda pītam। vāmena vigraha varena kalatra vantam। vārānasī purapatim bhaja viśvanātham।।2।।

bhūtādhipam bhujaga bhūṣana bhūśitāngam। vyāghra jinām baradharam jaṭilam trinetram। pāśān kuśābhaya varaprada śūlapānim। vārānasī purapatim bhaja viśvanātham।।3।।

sītām suśobhita kirīṭa virāja mānam। phālekśanā nala viśośita pancabānam।nāgādhipāracita bhāsura karna pūram। vārānasī purapatim bhaja viśvanātham।।4।।

pancānanam durita matta matanga jānām। nāgāntakam danuja pungava pannagānām। dāvānalam marana śoka jarāta vīnām। vārānasī purapatim bhaja viśvanātham।।5।।

tejomayam saguna nirgunam advitīyam। ānanda kandam-aparājitam aprameyam। nāgātmakam sakala niśkalamātma rūpam। vārānasī purapatim bhaja viśvanātham।।6।।

āśām vihāya parihrutya parasya nindām। pāperatim ca sunivārya manah samādhau। ādāya hrutkamala madhyagatam pareśam। vārānasī purapatim bhaja viśvanātham।।7।।

rāgādi dośa rahitam svajanānu rāgam। vairāgya śānti nilayam girijā sahāyam । mādhurya dhairya subhagam garalā bhirāmam। vārānasī purapatim bhaja viśvanātham।।8।।

vārānasī purapateḥ stavanam śivasya । vyāsoktham ashtakamidam pathate manuśya। vidyām śriyam vipula soukhyam-ananta kīrtim। samprāpya dehanilaye labhate ca mokśam।। viśvanāthāṣtakam idam yah pathet śiva sannidhau । śiva lokam avāpnoti śivena saha modate।।

अन्नपूर्णास्तोत्रम्

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १ ॥

नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमालविलत्-वक्षोजकुम्भान्तरी ।
काश्मीरागरुवासिता रुचिकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥२ ॥

योगान्दकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यसमस्तवाञ्छितकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥३ ॥

कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी
कौमारी निगमार्थगोचरकरी ओङ्कारबीजाक्षरी ।
मोक्षद्वारकवाटपाटनकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥४ ॥

दृश्यादृश्यप्रभूतवाहनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रकेलनकरी विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥५ ॥

उर्वीसर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी
वेनीनीलसमानकुन्तलहरी नित्यान्न-दानेश्वरी ।

सर्वान्दकरी दशाशुभकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥६ ॥

आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी
काश्मीरा त्रिजनेश्वरी त्रिलहरी नित्याङ्कुरा शर्वरी ।
कामाकाङ्क्षकरी जनोदयकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥७ ॥

देवी स्वर्णविचित्ररत्नरचित दाक्षायनी सुन्दरी
वामे स्वादुपयोधरा प्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी दृशा शुभकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥८ ॥

चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी
चन्द्राकाग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसाङ्कुशधरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥९ ॥

क्षत्रत्राणकरी महाभयकरी माता कृपासागरी
साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरीश्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १० ॥
अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देही च पार्वति ॥११ ॥

माता च पार्वती दवी पिता दवो महेश्वः ।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रम् ॥१२ ॥

śrī annapūrṇa stotram

nityānandakarī varābhayakarī saundarya ratnākarī
nirdhūtākhila ghora pāvanakarī pratyakṣa māheśvarī |
prāleyācala vaṁśa pāvanakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 1 ||

nānā ratna vicitra bhūṣaṇakari hemāmbarāḍambarī
muktāhāra vilambamāna vilasat-vakṣoja kumbhāntarī |
kāśmīrāgaru vāsitā rucikarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 2 ||

yogānandakarī ripukṣayakarī dharmārtha niṣṭhākarī
candrārkānala bhāsamāna laharī trailokya rakṣākarī |
sarvaiśvarya samasta vancitakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 3 ||

kailāsācala kandarālayakarī gaurī-umāśāṁkarī
kaumārī nigamārtha-gocarakarī-oṁkāra-bījākṣarī |
mokṣadvāra-kavātapātanakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 4 ||

dṛśyādṛśya-vibhūti-vāhanakarī brahmāṇḍa-bhāṇḍodarī
līlā-nātaka-sūtra-khelanakarī vijñāna-dīpāṁkurī |
śrī-viṣveśa-manaḥ-prasādanakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 5 ||

urvīsarvajayeśvarī bhagavatī mātānnapūrṇeśvarī
veṇī-nīlasamāna-kuntaladharī nityānna-dāneśvarī |

sarvānndakarī daśā śubhakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 6 ||

ādikṣānta-samastavarṇanakarī śambhostribhāvākarī
kāśmīrā trijaneśvarī trilaharī nityaṁkurā śarvarī |
kāma kaṅkṣakarī janodayakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 7 ||

devī sarva-vicitra-ratna-racitā dākṣāyiṇī sundarī
vāme-svādupayodharā priyakarī saubhāgya-māheśvarī |
bhaktābhīṣṭakarī daśā śubhakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 8 ||

candrārkānala-kotikoti-sadṛśī candrāṁśu-bimbādharī
candrārkāgni-samāna-kuṇḍala-dharī candrārka-varṇeśvarī
mālā-pustaka-pāśasāṁ-kuśadharī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 9 ||

kṣatratrāṇakarī mahābhayakarī mātā kṛpāsāgarī
sākṣān-mokṣa karī sadā śivakarī viśveśvarī śrīdharī |
dakṣā-krandakarī nirāmayakarī kāśīpurādhīśvarī
bhikṣāṁ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 10 ||

annapūrṇe sādāpūrṇe śaṁkara-prāṇavallabhe |
jñāna-vairāgya-siddhayarthaṁ bhikṣāṁ dehi ca pārvatī || 11 ||
mātā ca pārvatīdevī pitādevo maheśvaraḥ |
bāndhavā: śivabhaktāśca svadeśo bhuvana-trayam || 12 ||

शिवताण्डवस्तोत्रम्

ज्टाटवीगलज्जलप्रवाहपावितस्थले

गलेऽवलम्ब्यलम्बितांभुजङ्गतुङ्गमालिकाम् ।

डमड्डमड्डमड्डमन्निनादवड्डमर्वयं

चकार चण्ड ताण्डवं तनोतु नः शिवः शिवम् ॥१ ॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी

विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।

धगद्धगद्धगज्ज्वलल्ललाटपट्ट पावके

किशोर चन्द्रशेखरे रतिः प्रतिक्षणं मम ॥२ ॥

धराधरेन्द्रनन्दिनीविलासबन्धबन्धुर

स्पुरद्दिगन्तसन्ततिप्रमोद मानमानसे ।

कुपाकटाक्षधोरणीनिरुद्धदुर्धरापादि

क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥३ ॥

जटाभुजङ्गपिङ्गलस्पुरत्फणामणिप्रभा

कदम्बकुङकुमद्रवप्रलिप्तादिग्वधूमुखे ।

मदान्धसिन्धुरस्पुरत्त्वगुत्तरीयमेदुरे

मनो विनोदमद्भुतं बिभर्तु भूतर्तरि ॥४ ॥

सहस्रलोचनप्रभुत्यशेषलेखशेखर

प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभुः ।

भुजङ्गराजमालया निबद्धजाटजूटकः

श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥५ ॥

ललाटचत्वरज्वलद्धनञ्जयस्पुलिङ्गभा

निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।

सुधामयूखलेखया विराजमानशेखरं

महा कपालि सम्पदे शिरो जटालमस्तु नः ॥६ ॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल

द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके ।

धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक

प्रकल्पनैक शिल्पिनि त्रिलोचने रतिर्मम ॥६ ॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्पुर

त्कुहूनिशीथिनीतमः प्रबन्ध बद्धकन्धरः ।

निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः

कला निधानबन्धुरः श्रियं जगद्धुरन्धरः ॥७ ॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा

वलम्बिकण्ठकन्दलीरुचि प्रबद्धकन्धरम् ।

स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं

गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥९ ॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी

रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ॥

स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥१० ॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस
द्विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट् ।
धिमिद्धिमिद्धिमिद्ध्वनन्मृदङ्गतुङ्गमङ्गल
ध्वनि क्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥११ ॥

स्पृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥१२ ॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् ।
विलोललोललोचनो ललामभाल लग्नकः
शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥१३ ॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तम स्तवं
पठंन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमासु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥१४ ॥

पूजावसानसमये दशवक्त्रगीतं यः शम्भुपूजनपरं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥१५ ॥

śiva tādava stotraṁ

jaṭāṭa-avī-gala-jjala-pravāha-pāvita-sthale
gale-[a]valambya lambitāṁ bhujaṅga-tuṅga-mālikām |
ḍamaḍ-damaḍ-damaḍ-daman-ninādavaḍ-ḍamarvayaṁ
cakāra caṇḍa-tāṇḍavaṁ tanotu naḥ śivaḥ śivam || 1 ||

jaṭā-kaṭāha-sambhrama-bhraman-nilimpa-nirjharī
vilola-vīci-vallarī-virājamāna-mūrdhani |
dhagad-dhagad-dhagaj-jvalal-lalāṭa-paṭṭa-pāvake
kiśora-candra-śekhare ratiḥ pratikṣaṇaṁ mama || 2 ||

dharā-dharendra-nandinī-vilāsa-bandhu-bandhura
sphurad-diganta-santati-pramodamāna-mānase |
kṛpā-kaṭākṣa-dhoraṇī-niruddha-durdharā-[a]padi
kvacid-digambare mano vinodametu vastuni || 3 ||

jaṭā-bhujaṅga-piṅgaḷa-sphurat-phaṇā-maṇi-prabhā
kadamba-kuṅkuma-drava-pralipta-digvadhū-mukhe |
madā-[a]ndha-sindhura-sphurat-tvag-uttarīya-medure
mano vinodam-adbhutaṁ bibhartu bhūta bhartari || 4 ||

sahasra-locana-prabhṛty-aśeṣa-lekha-śekhara
prasūna-dhūḷi-dhoraṇī vidhūsarā-[a]ṅghri-pīṭha-bhūḥ |
bhujaṅga-rāja-mālayā nibaddha-jāṭa-jūṭaka
śriyai cirāya jāyatāṁ cakora-bandhu-śekharaḥ || 5 ||

lalāṭa-catvara-jvalad-dhanan-jaya-sphuliṅga-bhā-
nipīta-pasca-sāyakaṁ naman-nilimpa-nāyakam |

sudhā-mayūkha-lekhayā virājamāna-śekharaṁ
mahā-kapāli-sampade-śiro-jaṭālam-astu naḥ || 6 ||

karāla-bhāla-paṭṭikā-dhagad-dhagad-dhagajjvalad-
dhanan-jayā-[a]hutī-kṛta-pracaṇḍa-pañca-sāyake |
dharā-dharendra-nandinī-kucāgra-citra-patraka-
prakalpanaika-śilpini trilocane ratir-mama || 7 ||

navīna-megha-maṇḍalī niruddha-durdhara-sphurat-
kuhū-niśīthinī-tamaḥ prabandha-baddha-kandharaḥ |
nilimpa-nirjharī-dharas-tanotu kṛtti-sindhuraḥ
kaḷā-nidhāna-bandhuraḥ śriyaṁ jagad-dhurandharaḥ|| 8 ||

praphulla-nīla-paṅkaja-prapaṣca-kālima-prabhā-
[a]vilambi-kaṇṭha-kandalī-ruci-prabaddha-kandharam |
smaracchidaṁ puracchidaṁ bhavacchidaṁ makhacchidaṁ
gajacchidā[a]ndhakacchidaṁ tamantakacchidaṁ bhaje||9||

akharva-sarva-maṅgaḷā-kaḷā-kadamba-manjarī
rasa-pravāha-mādhurī vijṛmbhaṇā-madhu-vratam |
smarāntakaṁ purāntakaṁ bhavāntakaṁ makhāntakaṁ
gajāntakāndhakāntakaṁ tamantakāntakaṁ bhaje || 10 ||

jayat-vada-bhra-vibhrama-bhramad-bhujaṅgama-śvasad
vinirgamat-krama-sphurat-karāla-bhāla-havya-vāṭ |
dhimid-dhimid-dhimidhvanan-mṛdaṅga-tuṅga-maṅgaḷa
dhvani-krama-pravartita pracaṇḍa-tāṇḍavaḥ śivaḥ || 11 ||

spṛṣad-vicitra-talpayor-bhujaṅga-mauktika-srajor-
gariṣṭha-ratna-loṣṭhayoḥ suhṛd-vipakṣa-pakṣayoḥ |
tṛṣṇā-[a]ravinda-cakṣuṣoḥ prajā-mahī-mahendrayoḥ
sama-pravṛttikah kadā sadāśivaṁ bhajaamy-aham || 12 ||

kadā nilimpa-nirjharī-nikuṣja-koṭare vasan
vimukta-durmatiḥ sadā śiraḥstham-anjaliṁ vahan |
vilo-lola-locano lalāma-bhāla-lagnakaḥ
śiveti mantram-uccaran sadā sukhī bhavāmy-aham || 13 ||

imaṁ hi nityam-evam-uktam-uttamottamaṁ stavaṁ
paṭhan-smaran-bruvan-naro viśuddhime-[i]ti-santatam |
hare gurau subhaktim-āśu yāti nā-a[a]nyathā gatiṁ
vimohanaṁ hi dehināṁ su-śaṅkarasya cintanam || 14 ||

pūjā-[a]vasāna-samaye daśa-vaktra-gītaṁ yaḥ
śambhu-pūjana-paraṁ paṭhati pradoṣe |
tasya sthirāṁ ratha-gaje-[i]ndra-turaṅga-yuktāṁ
lakṣmīṁ sadaiva su-mukhiṁ pradadāti śambhuḥ || 15 ||

रुद्राष्टकम्

नमामीशमीशान निर्वाणरुपं ।विभुं व्यापकं ब्रह्मवेदस्वरूपम् ।
अजं निर्गुणं निर्विकल्पं निरीहं । चिदाकाशमाकाशवासं भजेहम् ॥१ ॥

निराकारमोङ्कारमूलं तुरीयं । गिरा ज्ञान गोतीतमीशं गिरीशम् ।
करालं महाकाल कालं कृपालं ।गुणागार संसारपारं नतोऽहम् ॥२ ॥

तुषाराद्रि संकाश गौरं गभीरं । मनोभूत कोटिप्रभा श्री शरीरम् ।
स्फुरन्मौलि कल्लोलिनी चारु गंङ्गा ।लसद्भालबालेन्दु कण्ठेभुजङ्गां ॥३ ॥

चलत्कुंडलं शुभ्र नेत्रं विशालं-प्रसन्नाननं नीलकण्ठं दयालम् ।
मृगाधीश चर्माम्बरं मुण्डमालं - प्रियं शंकरं सर्वनाथं भजामि ॥४ ॥

प्रचण्डं प्रकृष्टं प्रगल्भं परेशं । अखण्डं अजं भानुकोटिप्रकाशम् ।
त्रयः शूल निर्मूलनं शूलपाणिं । भजेऽहं भवानिपतिं भावगम्यम् ॥५ ॥

कलातीत कल्याण कल्पान्तकारी । सदा सज्जनानन्ददाता पुरारी ।
चिदानन्द-संदोह मोहापहारी । प्रसीद प्रसीद प्रभो मन्मथारी ॥६ ॥

न यावद् उमानाथ पादारविन्दं । भजंतीह लोके परे वा नराणाम् ।
न तावत्सुखं शान्ति सन्तापनाशं । प्रसीद प्रभो सर्वभूताधिवासम् ॥७ ॥

न जानामि योगं जपं नैव पूजां । नतोऽहं सदा सर्वदा शंभु तुभ्यम् ।
जरा जन्म दुःखौध तातप्यमानं । प्रभो पाहि आपन्नमामीश शंभो ॥८ ॥

rudrāṣṭakam

namāmīśamīśān nirvāṇarūpaṁ| vibhum vyāpakaṁ brahmavedasvarūpam| ajaṁ nirguṇaṁ nirvikalpaṁ nirīham| cidākāśamākāśavāsaṁ bhaje´ham|1|

nirākāramonkāramūlam turīyam| girā gyāna gotītamīśam girīśam| karālam mahākāla kālam kṛpālam| guṇāgāra samsārapāram nato'ham|2|

tuśārādri sankāśa gauram gabhīram|manobhūta koṭiprabhā śrī śarīram| sphuranmauli kallolinī cāru ganga| lasadbhālabālendu kanṭhebhujangā|3|

calatkundalam śubhra netram viśalam|pranannānanam nīlakanṭam dayālam| mṛgādhīśa carmāmbaram munḍamālam| priyam śankaram sarvanātham bhajāami|4|

pracaṇḍam prakṛṣṭam pragalbham pareśam| akhaṇḍam ajam bhānukoṭiprakāśam| trayaḥ śūla nirmūlanam śūlapāṇim| bhaje'ham bhavānīpatim bhāvagamyam|5|

kalātīta kalyāṇa kalpāntakārī| sadā sajjanānandadātā purārī| cidānanda-sandoha mohāpahāri| prasīda prasīda prabho manmanthārī|6|

na yāvad umānātha pādāravindam| bhajantīha loke pare vā narāṇam| na tāvatsukham śanti santāpanāśam| praīda prabho sarvabhūtādhivāsam|7|

na jānāmi yogam japam naiva pūjām|nato'ham sadā sarvadā śambhu tubhyam| jarā janma duḥkhaugha tātapyamānam| prabho pāhi āpannamāmīśa śambho|8|

राजोपचारः rājopacāraḥ - bhajans

शंकरा चन्द्रशेखर (śankarā candraśekhara)

शंकरा चन्द्रशेखर गङ्गाधरा सुमनोहरा
पाहिमाम् परमेश्वरा मृत्युंजय विश्वेश्वरा ॥

नीलकण्ठ फालनेत्र भस्मभूशित सुन्दरा
पाहिमाम् अभयन्करा गिरिजेश ओन्कारेश्वरा ॥

शंकरा चन्द्रशेखर गङ्गाधरा सुमनोहरा
पाहिमाम् परमेश्वरा मृत्युंजय विश्वेश्वरा ॥

ताण्डव प्रिय जय नटेशा विश्वनाथ महेश्वरा
पाहिमाम् करुणाकर व्याघ्रचर्मांबरधरा ॥ -- १

śankarā candraśekara gaṇgādharā sumanoharā |
pāhimāṁ parameśvarā mrityum jaya viśveśvarā||

nīlakanṭa phālanetre bhasambhūṣita sundarā |
pāhimām abhayankarā girijeśa oṁkāreśvarā ||

śankarā candraśekara gaṇgādharā sumanoharā |
pāhimāṁ parameśvarā mrityum jaya viśveśvarā||

tānḍava priya jaya naṭeśā viṣvanātha maheśvarā |
pāhimām karuṇākarā vyāgra-carmaṁbaradharа||

बोलो बोलो (bolo bolo)

बोलो बोलो सब मिल बोलो ॐ नमः शिवाय ॥
ॐ नमः शिवाय ॥ २
बोलो बोलो सब मिल बोलो ॐ नमः शिवाय ॥
जूट जटा में गंगाधारी । त्रिशूलधारी डमरु भजावे ॥
डमडम डमडम डमरु भजावे । गूंज उठा ॐ नमः शिवाय ॥
ॐ नमः शिवाय ॥ ॐ नमः शिवाय ॥ ॐ नमः शिवाय ॥ --२

bolo bolo sab mil bola oṁ namaḥ śivāya
oṁ namaḥ śivāya || oṁ namaḥ śivāya ||
bolo bolo sab mil bola oṁ namaḥ śivāya

jūṭ-jaṭā me gangā dhārī, triśūla-dhāri damaru bajāve
dama-dama dama-dama damaru bhajave
gūnj-uṭao namaḥ śivāya ||

oṁ namaḥ śivāya, oṁ namaḥ śivāya, oṁ namaḥ śivāya |

चन्द्रशेखराय नमः ओम् (candraśekarāya namaḥ oṁ)

चन्द्रशेखराय नम ओम। गङ्गाधराया नम ओम् ।
ओम् नमः शिवाय नम ओम्। हर हर हराया नम ओम्।
शिव शिश शिवाय नम ओम् । मृत्युम् जयाय नम ओम्॥

पद्मलोचनाय नम ओम् । पारमेश्वराय नम ओम् ।
पञ्चाननाय नम ओम् । भक्तप्रियाय नम ओम्।
शिव शिश शिवाय नम ओम् । मृत्युम् जयाय नम ओम्॥

त्रिपुरान्तकाय नम ओम् । दुतशेस्त्रहाय नम ओम् ।
त्रिगुणात्मकाय नम ओम् । त्रिशूलधराय नम ओम् ।
शिव शिश शिवाय नम ओम् । मृत्युम् जयाय नम ओम्॥

candraśekarāya namaḥ oṁ | gagādharāya namaḥ oṁ|
oṁ namaḥ śivāya namaḥ oṁ | hara hara harāya namaḥ oṁ
śiva śiva śivāya namaḥ oṁ | mṛtyum-jayāya namaḥ oṁ ||

padmalocanāya namaḥ oṁ | parameśvarāya namaḥ oṁ|
pancānanāya namaḥ oṁ | bhakta-priyāya namaḥ oṁ ||
śiva śiva śivāya namaḥ oṁ | mṛtyum-jayāya namaḥ oṁ ||

tripurānkāya namaḥ oṁ | dṛtha-seśrahāya namaḥ oṁ |
trigunatmakāya namaḥ oṁ | trishūla-dharāya namaḥ oṁ|
śiva śiva śivāya namaḥ oṁ | mṛtyum-jayāya namaḥ oṁ ||

दया करो शिव गङ्गाधरि (dayā karo śiva gangādhari)

दया करो शिव गङ्गाधरारि । कृपा करो शिव हे त्रिपुरारी ।
दया करो शिव गङ्गाधरारि ।

नाम माधुर शुभः माण्गल कारी । अलक निरंजन त्रिशूलधारि।
दया करो । दया करो । दया करो । बोला बंढारि।
कृपा करो । कृपा करो । कृपा करो । बोला बंढारि।

दया करो शिव गङ्गाधरारि । कृपा करो शिव हे त्रिपुरारी ।
दया करो शिव गङ्गाधरारि ।

dayā karo śiva gangādhari | kṛpā karo śiva he tripurārī|
dayā karo śiva gangādhari |

nāma madhura śubha maṇgala kāri |
alaka niranjana triśūla-dhāri |

dayā karo | dayā karo | dayā karo | bola bandāri |
kṛpā karo | kṛpā karo | kṛpā karo | bola bandāri |

dayā karo śiva gangādhari | kṛpā karo śiva he tripurārī|
dayā karo śiva gangādhari |

शिव शंभो शंभो (śiva śambho)

शिव शंभो शंभो । शिव शंभो महादेवा ।

हर हर हर हर महादेव शिव शंभो महादेवा ।

शिव ओम् । शिव ओम् । शिव ओम् नमः शिवाा ।

गङ्गाधर हर शंभो गौरिमनोहर शंभो ।

शिव ओम् । शिव ओम् । शिव ओम् नमः शिवाा ।

नंदि वाहना शंभो । नटनमनोहर शंभो ।

शिव ओम् । शिव ओम् । शिव ओम् नमः शिवाा ।

शिव ओम् ओम् ओम् हर ओम् ओम् ओम् शिन ओम् नमः शिवाया ॥

śiva śambho śambho śiva śambho mahādevā
hara hara hara hara mahādeva śiva śambho mahādeva
śiva oṁ, śiva oṁ ,śiva oṁ namaḥ śivāya.

gangādhara hara śambho gowri manohara śambho
śiva oṁ, śiva oṁ ,śiva oṁ namaḥ śivāya.

nandhi-vāhanā śambho naṭana manohara śambho
śiva oṁ, śiva oṁ ,śiva oṁ namaḥ śivāya.

śiva oṁ, oṁ, oṁ I śiva oṁ, oṁ, oṁ, I
śiva oṁ namaḥ śivāya.

शंभो शंकरा (śambho śankarā)

शंभो शंभो शंकरा । हर हर शंभो शंकरा ।

शिव शिव शंभो शंकरा । हर हर शंभो शंकरा

नन्दि वाहना शंकरा । नाग भूषणा शंकरा ।

काल लोचना शंकरा । पन्नगभूषण शंकरा ।

त्रिशूलपानी शंकरा । त्रिनेत्रधारी शंकरा ।

दया तरंगा शंकरा । सर्वेश्वरहर शंकरा ।

गङ्गाधर शंकरा । गौरिमनोहर शंकरा ।

कैलाशवाशा शंकरा । कामाक्षीपति शंकरा ।

जय जय शंभो शंकरा । जय जगधीश्वर शंकरा ।

जय जय जय शंकरा । हर हर हर शंकरा ।

śaṁbho śaṁbho śankarā I hara hara śaṁbho śankarā I
śiva śiva śankarā śankarā I hara hara śaṁbho śankarā I

nandi vāhanā śankarā I nāgabhūṣaṇa śankarā I
kāla locanā śankarā I pannaga-bhūṣaṇa śankarā I

triśūla pāṇi śankarā I trinetra dhāri śankarā I
dayā taranga śankarā I sarveśvara hara śankarā I

gangā-dhara hara śankarā I gowri-manohara śankarā I
kailāśavāśā śankarā I kāmākśī pathi śankarā I

jaya jaya śambho śankarā I jaya jagadhīśvara śankarā I
jaya jaya jaya jaya śankarā I hara hara hara hara śankarā II

ईशा महेशा (īśā maheṣa)

हर हर शंकर साम्बसदाशिव ईशा महेशा ।

ताण्डप्रिय कर चन्द्रकलाधर ईशा महेशा ।

अम्बासुत लाबोधरवन्दित ईशा महेशा ।

तुण्ग हिमाचल स्रिङ्ग निवासित ईशा महेशा ।

hara hara śaṁkara sāmbha-sadāśhiva īṣā maheṣa|

tanḍava priya kara candra-kalādhara īṣā maheṣa|

ambhā-suta labhodhara vandhita īṣā maheṣa|

tuṇga himācala ṣṛṇga nivāsita īṣā maheṣa|

हर हर महादेव

हर हर हर महादेव । शिव शंकर आधि देव ।

पामेश्वर अखिलेश्वर (4)ताण्डप्रिय शशिशेखर

विश्वधार विश्वनाथ (4) गङ्गाधर धीननाथ

hara hara hara mahādev | śiva śankara ādhi-deva |

pameśvara akhileśva (4) tānḍava priya śaśiśekhra |

viśva-dhara viśvanatha (4) gangāghara dhīnanāth ||

चमकप्रश्नः

ॐ अग्नाविष्णू सजोषसेमावर्धन्तु वां गिरः। द्युम्नैर्वाजे-भिरागतम्।

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे ॥१॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥२॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च

मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥५॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म

इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥६ ॥

अगंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपागंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥८ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥९॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवीच मे दित्यवाट् च मे दित्यौही
च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च
मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभ
श्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन
कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताग्
श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन
कल्पतां यज्ञो यज्ञेन कल्पताम् ॥१० ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे
त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविगृंशतिश्च
मे त्रयोविगृंशतिश्च मे पञ्चविगृंशतिश्च मे सप्तविगृंशतिश्च मे
नवविगृंशतिश्च मे एकत्रिगृंशच्च मे त्रयोस्त्रिगृंशच्च मे चतस्रश्च मेऽष्टौ च मे
द्वादश च मे षोडश च मे विगृंशतिश्च मे चतुर्विगृंशतिश्च
मेऽष्टाविगृंशतिश्च मे द्वात्रिगृंशच्च मे षट्त्रिगृंशच्च मे चत्वारिगृंशच्च मे
चतुश्चत्वारिगृंशच्च मेऽष्टाचत्वारिगृंशच्च मे वाजश्च प्रसवश्चा-पिजश्च
क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च
भुवनश्चाधिपतिश्च ॥११ ॥

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शगृंसिषद्विश्वे देवाः सूक्तवाचः
पृथिविमातर्मा मा हिगृंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि
मधुमतीं देवेभ्यो वाचमुद्यासगृं-शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै
पितरोऽनुमदन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

camaka-praśnaḥ

oṁ agnāviṣṇo sajoṣasemāvardhantu vāṁ giraḥ | dyumnair-vājebhirāgatam | vājaśca me prasavaśca me prayatiśca me prasitiśca me dhītiśca me kratuśca me svaraśca me ślokaśca me śrāvaśca me śrutiśca me jyotiśca me suvaśca me prāṇaśca me'pānaśca me vyānaśca me'suśca me cittaṁ ca ma ādhītaṁ ca me vākca me manaśca me cakṣuśca me śrotraṁ ca me dakṣaśca me balaṁ ca ma ojaśca me sahaśca ma āyuśca me jarā ca ma ātmā ca me tanūśca me śarma ca me varma ca me'ṅgāni ca me'sthāni ca me parūgṁṣi ca me śarīrāṇi ca me || 1 ||

jaiṣṭhyaṁ ca ma ādhipatyaṁ ca me manyuśca me bhāmaśca me'maśca me'mbhaśca me jemā ca me mahimā ca me varimā ca me prathimā ca me varṣmā ca me drāghuyā ca me vṛddhaṁ ca me vṛddhiśca me satyaṁ ca me śraddhā ca me jagacca me dhanaṁ ca me vaśaśca me tviṣiśca me krīḍā ca me modaśca me jātaṁ ca me janiṣyamāṇaṁ ca me sūktaṁ ca me sukṛtaṁ ca me vittaṁ ca me vedyaṁ ca me bhūtaṁ ca me bhaviṣyacca me sugaṁ ca me supathaṁ ca ma ṛddhaṁ ca ma ṛddhiśca me kluptaṁ ca me kluptiśca me matiśca me sumatiśca me || 2 ||

śaṁ ca me mayaśca me priyaṁ ca me'nukāmaśca me kāmaśca me saumanasaśca me bhadraṁ ca me śreyaśca me vasyaśca me yaśaśca me bhagaśca me draviṇaṁ ca me

yantā ca me dhartā ca me kṣemaśca me dhṛtiśca me viśvaṁ ca me mahaśca me saṁvicca me ṅṣātraṁ ca me sūśca me prasūśca me sīraṁ ca me layaśca ma ṛtaṁ ca me'mṛtaṁ ca me'yakṣmaṁ ca me'nāmayacca me jīvātuśca me dīrghāyutvaṁ ca me'namitraṁ ca me'bhayaṁ ca me sugaṁ ca me śayanaṁ ca me sūṣā ca me sudinaṁ ca me || 3 ||

ūrkca me sūnṛtā ca me payaśca me rasaśca me ghṛtaṁ ca me madhu ca me sagdhiśca me sapītiśca me kṛṣiśca me vṛṣṭiśca me jaitraṁ ca ma audbhidyaṁ ca me rayiśca me rāyaśca me puṣṭaṁ ca me puṣṭiśca me vibhu ca me prabhu ca me bahu ca me bhūyaśca me pūrṇaṁ ca me pūrṇataraṁ ca me'kṣitiśca me kūyavāśca me'nnaṁ ca me'kṣucca me vrīhayaśca me yavā"śca me māṣā"śca me tilā"śca me mudgāśca me khalvā"śca me godhūmā"śca me masurā"śca me priyaṅgavaśca me'ṇavaśca me śyāmākā"śca me nīvārā"śca me || 4 ||

aśmā ca me mṛttikā ca me girayaśca me parvatāśca me sikatāśca me vanas-patayaśca me hiraṇyaṁ ca me'yaśca me sīsaṁ ca me trapuśca me śyāmaṁ ca me lohaṁ ca me'gniśca ma āpaśca me vīrudhaśca ma oṣadhayaśca me kṛṣṇapacyaṁ ca me'kṛṣṇapacyaṁ ca me grāmyāśca me paśava āraṇyāśca yaṅṣena kalpantāṁ vittaṁ ca me vittiśca me bhūtaṁ ca me bhūtiśca me vasu ca me vasatiśca me

karma ca me śaktiśca me'rthaśca ma emaśca ma itiśca me gatiśca me || 5 ||

agniśca ma indraśca me somaśca ma indraśca me savitā ca ma indraśca me sarasvatī ca ma indraśca me pūṣā ca ma indraśca me bṛhaspatiśca ma indraśca me mitraśca ma indraśca me varuṇaśca ma indraśca me tvaṣṭhā ca ma indraśca me dhātā ca ma indraśca me viṣṇuśca ma indraśca me'śvinau ca ma indraśca me marutaśca ma indraśca me viśve ca me devā indraśca me pṛthivī ca ma indraśca me'ntarikṣaṁ ca ma indraśca me dyauśca ma indraśca me diśaśca ma indraśca me mūrdhā ca ma indraśca me prajāpatiśca ma indraśca me || 6 ||

agṁśuśca me raśmiśca me'dā"bhyaśca me'dhipatiśca ma upāgṁśuśca me'ntaryāmaśca ma aindravāyavaśca me maitrāvaruṇaśca ma āśvinaśca me pratiprasthānaśca me śukraśca me manthī ca ma āgrayaṇaśca me vaiśvadevaśca me dhruvaśca me vaiśvānaraśca ma ṛtugrahāśca me'tigrāhyā"śca ma aindrāgnaśca me vaiśvadevaśca me marutvatīyā"śca me māhendraśca ma ādityaśca me sāvitraśca me sārasvataśca me pauṣṇaśca me pātnīvataśca me hāriyojanaśca me || 7 ||

idhmaśca me barhiśca me vediśca me diṣṇiyāśca me srucaśca me camasāśca me grāvāṇaśca me svaravaśca ma uparavāśca me'dhiṣavaṇe ca me droṇakalaśaśca me

vāyavyāni ca me pūtabhṛcca ma ādhavanīyaśca ma āgnī"dhraṁ ca me havirdhānaṁ ca me gṛhāśca me sadaśca me puroḍāśā"śca me pacatāśca me'vabhṛthaśca me svagākāraśca me || 8 ||

agniśca me gharmaśca me'rkaśca me sūryaśca me prāṇaśca me'śvamedhaśca me pṛthivī ca me'ditiśca me ditiśca me dyauśca me śakvarīraṅgulayo diśaśca me yaṅṣena kalpantāmṛkca me sāma ca me stomaśca me yajuśca me dīkṣā ca me tapaśca ma ṛtuśca me vrataṁ ca me'horātrayo"r-dṛṣṭyā bṛhadrathantare ca me yaṅṣena kalpetām || 9 ||

garbhā"śca me vatsāśca me tryaviśca me tryavīca me dityavāṭ ca me dityauhī ca me paṣcāviśca me paṣcāvī ca me trivatsaśca me trivatsā ca me turyavāṭ ca me turyauhī ca me pasthavāṭ ca me pasthauhī ca ma ukṣā ca me vaśā ca ma ṛṣabhaśca me vehacca me'naḍvāṁ ca me dhenuśca ma āyur-yaṅṣena kalpatāṁ prāṇo yaṅṣena kalpatām-apāno yaṅṣena kalpatāṁ vyāno yaṅṣena kalpatāṁ cakṣur-yaṅṣena kalpatāg śrotraṁ yaṅṣena kalpatāṁ mano yaṅṣena kalpatāṁ vāg-yaṅṣena kalpatām-ātmā yaṅṣena kalpatāṁ yaṅṣo yaṅṣena kalpatām || 10 ||

ekā ca me tisraśca me paṣca ca me sapta ca me nava ca ma ekādaśa ca me trayodaśa ca me paṣcadaśa ca me saptadaśa

ca me navadaśa ca ma ekavigṁśatiśca me trayovigṁśatiśca me paṣcavigṁśatiśca me sapta vigṁśatiśca me navavigṁśatiśca ma ekatrigṁśacca me trayastrigṁśacca me catas-raśca me'ṣṭau ca me dvādaśa ca me ṣoḍaśa ca me vigṁśatiśca me caturvigṁśatiśca me'ṣṭāvigṁśatiśca me dvātrigṁśacca me ṣaṭ-trigṁśacca me catvārigṁśacca me catuś-catvārigṁśacca me'ṣṭācatvārigṁśacca me vājaśca prasavaścāpijaśca kratuśca suvaśca mūrdhā ca vyaśniyaś-cāntyāyanaś-cāntyaśca bhauvanaśca bhuvanaś-cādhipatiśca || 11 ||

oṁ iḍā devahūr-manur-yaṅsanīr-bṛhaspatirukthāmadāni śagṁsiṣad-viśve-devāḥ sū"ktavācaḥ pṛthivimātarmā mā higṁsīr-madhu maniṣye madhu janiṣye madhu vakṣyāmi madhu vadiṣyāmi madhumatīṁ devebhyo vācamudyāsagṁśuśrūṣeṇyā"m manuṣye"bhyastaṁ mā devā avantu śobhāyai pitaro'numadantu ||

oṁ śāntiḥ śāntiḥ śāntiḥ ||